पौषमासः
वर्षम् –६७
तृतीयोऽङ्कः
विक्रमाब्दः २०७२
युगाब्द ५११७
५ जनवरी २०१६

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



उत्तरायणमालम्ब्य मकरेऽर्कः प्रवर्तते ।
अर्घ्यमस्मै समर्प्यात्र मोदन्ते देशवासिनः ॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | रक्षकं शिक्षणम् | डॉ. हर्षदेवमाधवः | ६ |
| ५ | कामराजदीक्षितविरचितकाव्येन्दुप्रकाशस्य...... | श्रीमती शालूशर्मा | ८ |
| ६ | पुत्रिकासमीक्षा | देवर्षिकलानाथशास्त्री | १० |
| ७ | सर्वं सत्ये प्रतिष्ठितम् | ममता गुप्ता | १३ |
| ८ | अभिव्यक्तिपञ्चकम् | डॉ. कौशल तिवारी | १४ |
| ९ | पुराणेषु दानस्य महत्त्वम् | प्रतिभा शर्मा | १५ |
| १० | अस्माकं लोकदेवता-गोगाजी | परमानन्द शर्मा ''प्रमोदः'' | १७ |
| ११ | बाबासाहेब आप्टेमहोदयानां व्यक्तित्ववर्णनम्- | वेणीमाधव धर्माधिकारी | १९ |
| १२ | आदर्शसमाजस्य प्रतिबिम्बभूता......... | स्वाति जैनः | २० |
| १३ | भारतीमञ्जुनिकुञ्जम् | डॉ. रामनारायण झा | २३ |
| १४ | 'किं वयं जानीमः' - स्वपरीक्षणं कुर्मः | आचार्यमदनलाल शर्मा | २४ |
| १५ | व्याकरणशास्त्रे सूत्र-लक्षणम् | जितेन्द्रकुमारशर्मा | २५ |
| १६ | संस्कृतसाहित्ये माघस्य स्थानम् | योगेश कुमारः | २७ |
| १७ | ज्ञानगङ्गा | बद्रीप्रसादशर्मा | २८ |
| १८ | प्रेरक-प्रसङ्ग-शतकम् | श्रीमती आराधना धर्माधिकारी | २९ |
| १९ | नारी-स्तम्भः | डा. राजेश्वरी भट्ट | ३० |
| २० | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-689X

# भारती

## संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः श्रीराधासर्वेश्वरशरणदेवाचार्याः,

**प्रमुखसंरक्षकाः**
जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्त केशव आप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पाकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकाः
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी
डॉ. शिवचरणशर्मा

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम् :
श्याम कम्प्यूटर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974

## मङ्गलाचरणम्

तैलीनं गुडमिश्रितं सुमधुरं खादन्ति पौषे जनाः
आयाति प्रथमं यदा हि गगने सूर्यः प्रभाते तदा।
श्रद्धाभावभरा भजन्ति सततं स्थित्वातपे श्रीपतिम्
भास्वन्तं सुखहेतवे प्रतिदिनं पौषे भजन्ते जनाः।।

## मासावतरणम्

योत्स्ये दुर्बलपक्षतो हि समरे श्रुत्वा वचः पाण्डवाः
संहारक्षमतां विचिन्त्य तनयं मौर्व्यास्तदाबोधयन्।।
त्यक्तुं यद्वचनं मया तु गुरवे दत्तं समर्थोस्मि नो
श्रुत्वाऽयाचत मस्तकं सपदि यः तस्मै नमो विष्णवे।।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

पौषमासः
वर्षम् 67
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2072
जनवरी, 2016
अङ्कः - 3
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

( राजस्थान संस्कृत अकादमी के आर्थिक सहयोग से प्रकाशित )

नववर्षारम्भः

## सम्पादकीयम्

# अभीष्टा लोकतन्त्रस्य सुचारुता

❑ पं. प्यारेमोहनशर्मा

भारतस्य लोकतन्त्रं जगति प्रसिद्धम्। अत्र प्रतिपञ्चवर्षानन्तरं लोकसभायाः विधानसभायाश्च निर्वाचनानि जायन्ते। विजयीदलाय पूर्ववर्ति शासनारूढं दलं सारल्येन शासनं प्रयच्छति। नहि तत्र मनागपि काठिन्यं जायते। षष्टिवर्षेभ्यः क्रम एष प्रचलति। निर्वाचनसमये दलानि स्वकीयदलस्य प्रचारं कुर्वन्ति। दलस्य प्रमुखा नेतारः दलाध्यक्षाः वरिष्ठा दलाधिकारिणश्च जनसभासु भाषन्ते। प्रथमप्रधानमन्त्रिणः पंडित जवाहरलालनेहरुमहोदयादारभ्य अटलबिहारीवाजपेयी-पर्यन्तं ततोऽग्रेऽपि च सर्वे नेतारः शिष्टभाषया जनसभाः समबोधयन्। नहि ते पूर्ववर्तिनं शासनं गालिप्रदानेन सत्कृतवन्तः। न च व्यक्तिविशेषस्य दोषानवर्णयन्। अत एव विश्वस्मिन् विश्वे भारतीयं लोकतन्त्रमादर्शलोकतन्त्र-मित्यमन्यन्त सर्वाणि राष्ट्राणि।

संसत्सु विपक्षिदलानि विरोधं कुर्वन्ति स्म। बहिष्कारमप्यकुर्वन्। परन्तु तत् सर्वं कृत्वापि संसदः कार्यं प्रचलेदित्यभिलषन्तिस्म। शासनारूढं दलमपि अहंकारेण मदोन्मत्तं नाभवत्। अत एव लोकतन्त्रं प्रशस्यम्। मनमोहनो दशवर्षाणि प्रधानमन्त्रिपद-मलञ्चकार। यद्यपि स अर्थशास्त्रविशेषज्ञोऽविद्यत। परन्तु सम्पूर्णदेशस्य प्रधानमन्त्रिरूपेण नासौ साफल्यमलभत। अतो भारतं शक्तिहीनं राष्ट्रमिति धारणा जगति संजाता। किमन्यत्-अमरीकाया राष्ट्रपतिः जार्जबुशो यदा भारतं समागच्छत् भारतस्य प्रधानमन्त्रिणा सह वार्तालाप-कार्यक्रमः सुनिश्चितः संजातः तदा मनमोहनः रात्रिपर्यन्तं चिन्ताग्रस्तोऽजायत। असौ व्यचारयत् सर्वशक्तिसम्पन्न-स्य राष्ट्रस्य राष्ट्राध्यक्षेण सह अहं कथं वर्तिष्ये कया रीत्या च वार्तालापं विधास्यामि। एतदतिरिक्तं कोयला-घोटालाकाण्डं संजातम्। कोयलामन्त्रालयश्च मनमोहन-समीप एवाविद्यत। अतः कर्तव्यनिष्ठोऽप्यसावसन्धानः प्रधानमन्त्रिणो दायित्वं संभालयितुमक्षम इति धारणा प्रससार। इतश्च काँग्रेसाध्यक्षा श्रीमती सोनियागान्धि-महोदया अपि स्व-पुत्रमग्रेसरं विधातुं तस्मै उपाध्यक्षपदे न्ययोजयत्। एतेन जनताया धारणा काँग्रेस दलविरोधिनी संजाता।

समागतः षोडशतमः संसदो निर्वाचनकालः। निर्वाचनाय दलानि सन्नद्धानि संजातानि। श्रीनरेन्द्रमोदी कुशलो मुख्यमन्त्री कुशलः संघटकश्चेति गुजरातप्रान्तस्य निरन्तरं पञ्चदशवर्षाणि शासनेन लोकधारणा सुदृढा संजाता। भारतीयं जनतादलं नरेन्द्रमोदिनं निर्वाचनात् पूर्वमेव प्रधानमन्त्रिणमजूघुषत् श्रीनरेन्द्रमोदीमहोदयोऽपि अहर्निशं सम्पूर्णदेशे स्वदलाय मतानि प्राप्तुमभ्रमत्। चतुःशताधिकाः सभाः समबोधयच्च। फलतः षोडशी-लोकसभायां भारतीयजनतादलेन बहुमतमधिगतम् श्रीनरेन्द्रमोदीमहोदयश्च प्रधानमन्त्रिपदमलञ्चकार। असौ प्रधानमन्त्रिपदादभाषत यन्मदीयं शासनं देशस्य विकासाय कार्यं विधास्यति। सर्वेषां सहयोगेन वयं कार्यं करिष्यामः। विश्वस्य राष्ट्राणां यात्राप्यनेन सोत्साहं विहिता। अमरीकायां भारतीयाः प्रवासिनः लक्षाधिक-संख्यायां समुपस्थिता भूत्वा श्रीनरेन्द्रमोदीमहोदयस्य भारतीय-प्रधानमन्त्रिणोऽतिभव्यं स्वागतं चक्रुः। तत्रत्या जना अन्यानि च राष्ट्राणि अवदन्-यदेतादृशं भव्यं स्वागतमितः

पूर्वं तत्र न कस्यापि देशस्य प्रधानमन्त्रिणोऽन्यस्य वा संजातम्। अमरीकाया राष्ट्रपतिः स्वयमग्रे समागत्य-श्रीमोदिनः स्वागतमकरोत्।

अस्तु, परन्तु हिन्द्यामुक्तिर्विद्यते ''प्रभुता पाई काहि मद नाहीं'' ''कर देखो विचार मन माँहिं''। अतः बहुमतेन शासनारूढं भारतीयं जनतादलं तदीया नेतारस्तदीयो राष्ट्राध्यक्षः स्वयं प्रधानमन्त्रिमहोदयोऽपि शासनेना-हंकारिणः समभूवन्।

अस्तु अहं सर्वं विधास्यामि। मदीयनाम्नैव जनाः प्रभाविता जायन्ते इति भ्रमो दिल्यां निर्वाचनेऽसफलतया सद्य एव दूरं गतः, परन्तु पुनरपि भारतीय-जनता-दलाध्यक्षोऽमितशाहो बिहारप्रान्ते वयं बहुमतं प्राप्स्यामः इति सगर्वमवादीत्। अनर्गलभाषया लालूप्रसादाय चौरशिरोमणिरित्यवदत्। अस्माकं सविधे राष्ट्रीयस्वयं-सेवकसंघस्य समर्पिताः कार्यकतारो विद्यन्ते ते प्रतिगृहं यास्यन्ति। प्रत्येकेन जनेन सह मेलिष्यन्ति। विकासमार्गं प्रदर्शयिष्यन्ति सुनिश्चितं वयमेव जेष्यामः। प्रधानमन्त्री श्रीनरेन्द्रमोदीमहोदयोऽपि ''डी.एन.ए.'' परीक्षणं विधास्यामो वयम् नहि नीतीशो बिहारप्रान्तपुत्रः इत्यादिकं सदर्पमजूघुषत्। सार्धलक्षैकरूप्यकमपि बिहारप्रान्तस्य विकासाय सद्यः प्रायच्छत्। वयं दातारो इति अमन्यन्त भारतीजनतादलनेतारः। परन्तु ते रहीमदासस्योक्तिं व्यस्मरन्। रहीमदासः सदैव विनम्रभावेन याचकेभ्यो वस्तूनि प्रायच्छत् तदा केनापि-पृष्टोऽसावुदरत् ''देनेवाला देत है, देता है दिन रैन, लोग भरम हम पै करे ताते नीचे नैन''।

अतः दम्भस्य फलं बिहारप्रान्तेऽप्यसा फल्यत्वेनैव लब्धम्। नीतीशो विनम्रभावेन महाघटबन्धनं विधाय पूर्णं बहुमतं प्रापत्।

अतः कथनस्यायमभिप्रायो विद्यते यद् नेतारः भाषणेषु शिष्टां भाषां प्रायुञ्जीरन्। नहि अपशब्दैः कस्याप्य-पमानं कुर्युः सम्प्रति प्रधानमन्त्रीमहोदयः सर्वं ज्ञात्वा विनम्रः सञ्जातः, परन्तु विपक्षीयं कांग्रेसदलं संसदि कोलाहलं विधाय कार्ये बाधामुत्पादयति। संसदः सत्रे न किमपि कार्यं जायते। अत्रेदं विचारणीयं विद्यते यत् सर्वतः प्राचीनं कांग्रेसदलमेव यदि संसदमवरोत्स्यति तर्हि अन्येषां तु कथैव का ? अन्यानि दलानि संसदं सुचारूरूपेण चालयितुमिच्छन्ति परन्तु कांग्रेसदलं कस्यापि न शृणोति।

अधुना कांग्रेसदलं हेराल्डविषये निरन्तरं कोलाहलं विदधाति दिसम्बरमासस्यैकादशे दिनाङ्केऽपि तथैव तैः कृतम्। प्रत्युत्तरे तेऽवदन् अस्य कोलाहलस्य हेराल्ड अथवा जी. एस. टी. प्रकरणेन सह न कोऽपि सम्बन्धो विद्यते। वयं तु सर्वकारस्य द्विधानीतेः विरोधं कुर्मः। पूर्वो वित्तमन्त्री चिदम्बरोऽवदत् सिन्धियामहोदयं प्रति विहितस्याप-शब्दस्य (टिप्पण्या) विरोधे कृतोऽयं कोलाहलः। सर्वकारपक्षतो लोकसभाध्यक्षतोऽस्मिन् विषये किमप्याश्वासनं न प्राप्तमिति कृत्वा काँग्रेसदलं लोकसभातो बहिर्निःससार। तृणमूलकाँग्रेसराजद-जेडीयूसांसदा अपि काँग्रेसदलेन सह-अगच्छन्। इतो राज्यसभायामपि न किमपि कार्यं संजातम्। वारंवारं गतिरोधः समुत्पन्नः। राज्यसभाया उपसभापतिः पीजे कुरियन् अवदत्-अहं क्षमां याचे केचन सदस्याश्श्री-कुर्वन्ति, तदतीव दुर्भाग्यपूर्णं-विद्यते। वयं सदनं न चालयामः। मुख्यविधेयकाः स्थगिताः विद्यन्ते। भवन्तः स्वकर्तव्यपालनेऽसफलाः जायन्ते। अतो निवेदनमस्ति यत् सर्वे मिलित्वा लोकतन्त्रं सुचारूरूपेण परिचालयन्तु।

मुरारिबापू सूत्राणि।

# रक्षकं शिक्षणम्

❑ डॉ. हर्षदेवमाधवः

## प्रेमवीक्षणः शिक्षकः

शिक्षकाय नानाविधा उपाधयः सन्ति। 'शिक्षाशास्त्री' 'विद्यावाचस्पतिः' इत्यादयः उपाधयः सन्ति। मानवजीवनस्य रक्षकं शिक्षणमस्तीति मे मतिः। छात्रस्य ज्ञानं परिपाल्य वर्धनं कृत्वा सर्वभयेभ्यो रक्षति तदेवास्ति शिक्षणम्। मनुष्यः शिक्षणेन स्वजिह्वाम् असत्यवचनाद् रक्षति, अनृतव्यवहाराद् रक्षति स्वात्मानम् मृत्यो रक्षति जीवात्मानम्।

प्रेम्णा वीक्षणं यस्य सः। स एव शिक्षकः। अथवा प्रेमपूर्वकं वीक्षणं यस्य स शिक्षकः। शिक्षकदृष्टिः शिष्यं भाररहितं कर्तुं क्षमा भवेत्। बालके अस्माकं प्रीतिर्वर्तते अत एव वयं तं वोढुं क्षमाः। तथैव शिक्षकोऽपि शिष्याज्ञानभारं वोढुं क्षमः। शिष्यं यः प्रेमपूर्वकं ज्ञानमार्गे वहति स एव शिक्षकोऽस्ति। कृष्णो विश्वप्रेम्णः पर्यायोऽस्ति अत एव सर्वे कृष्णं वन्दे जगद्गुरुम् इति वदन्ति। रक्षणं हस्तेन भवति, वीक्षणं नेत्रेण भवति। मनुष्यो हस्तयुक्तोऽस्ति, विहगः पक्षयुक्तोऽस्ति। शिक्षकस्य समीपे रक्षणार्थं हस्तौ भवतः, शिष्यं ज्ञान-गगनं नेतुं पक्षौ भवतः। अतएव शिक्षकः प्रेमवीक्षणो भवेदिति मे मतिः।

'द्वा सुपर्णा सयुजा' मन्त्रो गुरुशिष्ययो रूप-कमप्यस्ति। गुरुशिष्यौ ज्ञानवृक्षोपासकौ स्तः। ज्ञानामृतफलास्वादकः शिष्यो भवेत् तथा गुरुणा व्यवहर्तव्यम्।।

### 'जयति' शब्दात् 'प्रियोऽस्ति' उचितः।

यदा यदा वयं रामो जयति सत्यमेव जयते 'रामो विजयतेतराम्' इत्यादीनि वाक्यानि वदामः तदा तदा द्वन्द्ववशात् पराजयोऽपि नेपथ्ये तिष्ठति। यदा सत्यस्य जयो भवति, धर्मस्य जयो भवति तदा असत्यस्य नाशो भवेत्, अधर्मस्य नाशो भवेदिति मनसि वर्तते। वस्तुतः सत्येन जयपराजययोः नास्ति सम्बन्धः। वयं कस्मात् 'राम' 'धर्म' 'सत्य' इत्यादीन् शब्दान् वा सन्दर्भान् वा द्वन्द्व-कारागारे रुन्ध्मः? गोस्वामिभिः तुलसीदासैः कथितं यत् 'प्रिय लागहु मोहि राम' 'रामः प्रियोऽस्ति' 'रामः प्रियतमोऽस्ति' तदा सर्वमपि जगत् प्रियमस्ति यतो विश्वमपि तेन निर्मितं, तस्यैवांशोऽस्ति।

'सीयराममय सब जग जानी' इत्यपि प्रसिद्धम्। अत एव 'रामो जयति' इत्यस्माद् वाक्याद् ऋते 'रामः प्रियोऽस्ति-प्रियः स्याद्' इति मह्यं रोचते। यदा रामः प्रियोऽस्ति तदा तस्य एव विजयोऽस्ति।

### 'सद्गुरुः' 'गुरुः' शब्दात् साधीयान्।

सद्गुरुः शब्दो मे प्रियतमोऽस्ति। गुरोः असौ साधीयान् श्रेयाँश्च। 'सद्गुरुः' शब्दः मध्यकालीनभजनेषु प्रयुक्तः। वस्तुतः गुरुः ब्रह्मा, विष्णुः, महेश्वरः, गुरुरेव परं ब्रह्म, किन्तु कालवशात् गुरौ कलिमलः प्रविष्टःस्यात्। गुरुः शिष्यस्य शोषणकर्ता जातः स्यात्। अत एव 'सद्गुरुः' इत्ययं शब्दः साधीयान्। सद्गुरुः सन्मार्गं प्रत्येव नयति शिष्यम्।

'गुरुः' इत्यस्मिन् शब्दे गकारः गगनव्यापकत्वं सूचयति। गुरुः ज्ञानेन अमेयः, सङ्कीर्णतारहितः, विशालहृदयो भवेत्। गुरुः गङ्गाप्रवाहवत् निर्मलः पवित्रोऽपि अस्ति। रामायणे कथितम् 'गुरु विवेकसागर जगु जाना।' गुरुर्विवेकसागरोऽस्ति गुरोर्देहः कामं घटसदृशः स्यात् किन्तु मानुषे देहघटे असौ गगनं धारयति। वयं गगनं स्कन्धे, मस्तके, हस्तयोर्धारयामः,

वहाम:, किन्तु गगनस्य नास्ति भार:, घटोऽपि यत्र कुत्रचित्-पानीयस्थाने, पीठे, भूमौ-यत्र तत्र निवेशयितुं शक्य:। तथैव गुरुरपि अभिमानरहित:, अहङ्कारहीन:, ज्ञानभाररहित: भवेत्।

गकार: ग्रन्थस्य सूचक:। गुरु: सजीवो ग्रन्थ:। गुरौ सर्वे ग्रन्था: समाविष्टा: भवन्ति। गुरु: विवेकसागर: गणेशसदृश:। गणेशादधिको न कोऽपि विवेकी। रामायणे गणेश: मातृभक्तो निरूपित:। गणेश: पृथिव्या: प्रदक्षिणां परित्यज्य पार्वतीपरमेश्वरयो: प्रदक्षिणां करोति। अत एव गुरुरपि माता, स एवास्ति पिता। 'मोरे तुम्ह प्रभु गुरु पितु माता' इति गोस्वामिन: तुलसीदासा: कथयन्ति। गुरु: गिर: गकारोऽस्ति। गुरुवचनं, गुरुवाणी, गुरुगिरा, गुरो: शब्दे - एतत् सर्वं समाविष्टं भवति सद्गुरु: सच्चिदानन्दोऽस्ति। इत्थं गुरुतत्त्वं सर्वलक्षणभूषितं वर्तते।

**व्याख्याकारा: प. पू. मुरारिबापू महाभागा:**

**रूपान्तरं सूत्ररचना - डॉ. हर्षदेवमाधव:**

# दिल्ली संस्कृत अकादमी, दिल्ली सरकार

**प्लाट सं. 5, झण्डेवालान, करोल बाग, नई दिल्ली-110005**

## आवश्यक सूचना

दिल्ली संस्कृत अकादमी 'अखिल भारतीय संस्कृत श्लोक समस्यापूर्ति प्रतियोगिता' हेतु श्लोकों को आमन्त्रित कर रही है। जिसमें श्लोक का चौथा चरण 'भ्रष्टाचारोच्छेदो भूयात्' होगा। यदि आप इस प्रतियोगिता में भाग लेना चाहते हैं तो प्रपत्र में निर्दिष्ट निर्देशों का अनुपालन करते हुए अपनी प्रविष्टि 25-1-2016 तक इस कार्यालय में प्राप्त कराने की कृपा करें। प्रविष्टियाँ अकादमी के ई-मेल delhisanskritacademy@gmail.com पर भी प्रेषित कर सकते हैं। आपसे यह भी निवेदन है कि इस प्रतियोगिता में भाग लेने के लिए इच्छुक अन्य संस्कृत के विद्वानों को भी सूचित करने का कष्ट करें। प्रविष्टि अकादमी कार्यालय में प्राप्त करने की अन्तिम तिथि 25-1-2016 है।

**पुस्कार :-**इस प्रतियोगिता में प्रथम पुरस्कार रु. 3000/-, द्वितीय रु. 2500/-, तृतीय रु 2000/-, चतुर्थ रु 1500/-, पंचम रु. 1200/-, षष्ठ 1000/-, सप्तम रु. 600/-, तथा प्रोत्साहन स्वरूप रु. 500/- के आठ पुरस्कार होंगे।

प्रतिभागी निम्नलिखित दिशा निर्देशों की दृष्टि में रखकर ही अपनी रचना भेजें।

**प्रतियोगिता के नियम निम्न प्रकार से है :-**

✍ श्लोक छन्दोबद्ध होना चाहिए।

✍ श्लोक स्वरचित एवं मौलिक होना चाहिए। (स्वहस्ताक्षरित घोषणा संलग्न करें)

✍ श्लोकों की संख्या 15 से कम या अधिक नहीं होनी चाहिए।

✍ श्लोकों का कोई भी अंश राष्ट्र-विरोधी और किसी दल विशेष तथा व्यक्ति विशेष पर आक्षेप युक्त नहीं होना चाहिए।

हस्ताक्षर
**( डॉ जीतराम भट्ट )**
सचिव

# कामराजदीक्षितविरचितकाव्येन्दुप्रकाशस्य एकमध्ययनम्

❑ श्रीमती शालूशर्मा

लोकोत्तरवर्णननिपुणकविकर्म काव्यमिति सर्वे जानन्ति एव, परन्तु काव्यलक्षणविषये संस्कृतज्ञानां नैकमत्यम्। केचन मम्मटं, केचन विश्वनाथं, केचन जगन्नाथं साधिष्ठं मन्यन्ते। आचार्यमम्मटेनोक्तं काव्यप्रकाशे –

**तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि इति।**

अर्थात् शब्दार्थौ अदोषौ, सगुणौ, सर्वत्र सालङ्कारौ क्वचित् अस्फुटालङ्कारौ अपि काव्यं कथ्यते। एवमेव विश्वनाथेनोक्तं साहित्यदर्पणे –

**वाक्यं रसात्मकं काव्यम् इति।**

सामान्यतः काव्यस्य भेदद्वयं प्रथते– १. श्रव्यकाव्यम् २. दृश्यकाव्यञ्च। यथोक्तं साहित्यदर्पणे

**दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् इति।**

**श्रव्यकाव्यम्–**

पुनः श्रव्यकाव्यं त्रिप्रकारम् – १. गद्यम् २. पद्यम् ३.चम्पूकाव्यञ्च। यथोक्तं काव्यादर्शे दण्डिना –

**गद्यं पद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम्।**

साहित्यदर्पणे एवमुक्तम्–

**गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते।**

स्वीययाऽर्थप्रधानतया गद्यकाव्यं गौरवशालि, यतोहि पद्यकाव्यं कियतांशेन रागद्वारापि श्रोतृजनमनांस्याकर्षति, गद्यकाव्यं तु स्वीयेनार्थगौरवेणैव श्रोतृजनहृदयान्यावर्जयेत्। गद्यकाव्यगतमर्थगौरवं पद्यकाव्यगतमर्थगौरवपुरस्कृतं रागमयत्वं चेत्युभयं मिलितं सदधिकं चमत्कारं जनयेदिति भावनैव चम्पूकाव्यस्योत्पत्तौ कारणत्वेन सम्भाव्यते।

**गद्यकाव्यं द्विविधं विभक्तं –१. कथा २. आख्यायिका चेति।**

**पद्यकाव्यमपि पुनः त्रिप्रकारं – १. महाकाव्यं २. खण्डकाव्यं ३. मुक्तककाव्यञ्चेति।**

काव्यशास्त्रशब्देन मया तत् साहित्याङ्गं विवक्षितं यत्र काव्यभेदतत्स्वरूपतद्गतदोषगुणालङ्कारादिनिरूपणं क्रियते। काव्यस्वरूपनिरूपणप्रसङ्ग एव तद्विभावादिरूपतया नायिकानां नायकानां च भेदा अपि प्राप्तनिरूपणा भवन्ति तेन तदप्यस्य शास्त्रस्याङ्गभावं भजन्ते। इदं शास्त्रं प्रागलङ्कार-शास्त्रनाम्ना व्यवह्रियते स्म, यतः पुरा काव्यजीवनतयाऽलङ्कारा एव मन्यन्ते स्म।

**काव्यशास्त्रस्याभिधानम् –**

संस्कृतशास्त्रेषु काव्यशास्त्रस्य महत्त्वपूर्णं स्थानं वर्तते। काले काले अस्य शास्त्रस्य विभिन्ननामानि प्रचलितानि। तत्राद्यं नाम क्रियाकल्पः क्रियाविधिर्वा। रामायणे क्रियाकल्पशब्दस्य उल्लेखो वर्तते। तद्यथा –

**क्रियाकल्पविदश्चैव तथा काव्यविदो जनान्।**

ललितविस्तरनामके बौद्धग्रन्थे क्रियाकल्पाख्यायाः शास्त्रविद्यायाः उल्लेखः कृतः। तत्र क्रियाकल्पशब्दस्य व्याख्यां कुर्वता जयमङ्गलाटीकाकारेण लिखितं-क्रियाकल्प इति काव्यकरणविधिः काव्यालङ्कार इत्यर्थः। दण्डिना काव्यादर्शे क्रियाविधिसंज्ञा प्रयुक्ता–

**वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम्।**

काव्यशास्त्रमिति संज्ञा अतिशयेन प्रचलिता प्रसिद्धा च संज्ञा वर्तते। भामहवामनादिभिः स्वस्वग्रन्थानां नामकरणे अलङ्कारसंज्ञा प्रयुक्ता। तस्मिन् काले अलङ्कारतत्त्वस्य प्राधान्यात् महत्त्वाच्चेदं शास्त्रमलङ्कारशास्त्रमिति संज्ञां प्राप्नोत्। इयं संज्ञा अद्यापि प्रचलति। आधुनिककाले अनया संज्ञया सह काव्यशास्त्रसाहित्यशास्त्रसंज्ञयोः अपि प्रचलनं वर्तते। एवमलङ्कारशास्त्रमिति संज्ञा प्राचीनतमा सर्वाधिकप्रसिद्धा च। अस्याः संज्ञायाः औचित्यं प्रतिपादयता काव्यालङ्कारसूत्रवृत्तेः कामधेनुटीकाकारेणोक्तं–

योऽयमलङ्कारः काव्यग्रहणहेतुत्वेन उपन्यस्यते तद्व्युत्पादकत्वाच्छास्त्रमपि अलङ्कारनाम्ना व्यपदिश्यत इति शास्त्रस्यालङ्कारत्वेन प्रसिद्धिः प्रतिष्ठिता स्यादिति सूचयितुमयं विन्यासः कृतः काव्यं ग्राह्यमलङ्कारादिति।

काव्यशास्त्रे काव्यसमीक्षाविषयकतत्त्वानां विवेचनं भवति। तदाह संस्कृतसाहित्येतिहासे पण्डितः विश्वनाथशास्त्री भारद्वाजः काव्यानां लक्षणभेददोषगुणालङ्काररसादीनां यत्र विचारः प्रस्तूयते तदलङ्कारशास्त्रम्। अन्येषु विषयेषु सत्स्वपि अलङ्कारतत्त्वमेव अवलम्ब्य कथं नामकरणमिति जिज्ञासायां प्रतापरुद्रयशोभूषणस्य रत्नापणटीकाकारेणोक्तं-यद्यपि रसालङ्काराद्यनेकविषयमिदं शास्त्रं तथापि छत्रिन्यायेन काव्यशास्त्रमुच्यते।

काव्यशास्त्रसंज्ञायामलङ्कारशब्दः सौन्दर्यवाचक इति केषाञ्चन मतम्। तदाह डॉ. जगदीशचन्द्रमिश्रः अलङ्क्रियते-ऽनेनेति करणव्युत्पत्तिनिष्पन्नो यमकोपमादिबोधको नायमलङ्कारशब्दः किन्तु अलङ्कृतिरलङ्कारः इति भावव्युत्पन्नो दोषापगमगुणालङ्कारसंवलनकृतसौन्दर्यपरः, तत्प्रतिपादकत्वादेवास्यालङ्कारनाम्ना व्यपदेशः। अलङ्कारशास्त्रस्य पूर्वोक्तार्थे एव काव्यशास्त्रशब्दस्यापि प्रयोगो भवति। काव्यस्य जीवनाधायकरसगुणालङ्कारादीनां सर्वेषां तत्त्वानां निरूपणमस्मिन्नेव भवति। काव्यस्य सर्वेषामुपकरणानां शासनमर्थात् शास्त्रीयविवेचनमस्मिन् शास्त्रे प्राधान्येन भवति तेन काव्यशास्त्रमिति व्यपदिश्यते।

**विषयोपस्थापनम्**

संस्कृतभाषायां काव्यशास्त्रग्रन्थानां संख्या न तथा लघ्वी नाप्यतिभूयसी, तथापि शताधिका काव्यलक्षणग्रन्थकारा गणयितुं शक्यन्ते। तेषु काव्यशास्त्रकारेषु प्रसिद्धकृतीनां कतिपयकाव्यशास्त्रकाराणां यथोपलब्धं वृत्तं पूर्वमत्र निर्दिष्टम्। तेष्वेव काव्यशास्त्रकारेषु अन्यतमः काव्यशास्त्रकारः वर्तते कामराजदीक्षितमहाशयः। येन काव्येन्दुप्रकाशनामकमन्यतमं काव्यलक्षणपुस्तकं लिखितम्।

**विषयस्य चयने कारणम्-**

काव्यशास्त्रे प्रायः सर्वेषामेव शास्त्राणां निष्कर्षा उपलभ्यन्ते। अतः शास्त्रमिदं सुतरां लोकप्रियम्। एते लक्षणग्रन्था अद्यावधि विलिख्यमानाः सन्ति। किन्तु प्रायः शताब्दीद्वयात् पूर्वं लिखितस्य कामराजदीक्षितविरचितस्य ग्रन्थस्यैकस्य यशो विशेषतः प्रसृतमासीत्। परन्तु नायं सम्पूर्णम् उपलभ्यते। अतो ग्रन्थस्यास्य विषये जिज्ञासाऽभूत्। काव्यशास्त्रमवलम्ब्य सर्वाङ्गीणो ग्रन्थो विलेख्य इति विचारे समुत्पन्ने **कामराजदीक्षितमहोदयेन काव्येन्दुप्रकाशग्रन्थः लिखितः।** तत्र विद्यमानज्ञानम् एतावत् तमसि वर्तते, खेदकरोऽयं विषयः अस्माकं भारतीयानां कृते इति अस्पृष्टम्, अनुद्घाटितम्, अप्रकाशितञ्च इमं ग्रन्थं ज्ञात्वा मया अयं ग्रन्थः समीक्षात्मकसम्पादनाय स्वीकृतः।

विषयनिर्देशः-

अत्र मया **कामराजदीक्षितमहोदयेन** विरचित-**काव्येन्दुप्रकाशग्रन्थस्य** सम्पादनं तथा अस्य ग्रन्थस्य समीक्षणं क्रियते।

**ग्रन्थस्य सामान्यतः परिचयः महत्त्वञ्च -**

अस्माभिर्विशेषप्रयत्नैरुपलब्धायाः पाण्डुलिपेरन्ते **इति काव्येन्दुप्रकाशे द्वादशकलोल्लासः।** इति पुष्पिका तथा कलोल्लास समाप्त्यनन्तरमपि पुष्पिकेयं दृश्यते।

ग्रन्थोऽयमत्यन्तप्रौढः काव्यशास्त्रस्य ग्रन्थो वर्तते। अत्र काव्यस्य षोडशतत्त्वानां वर्णनं विहितम्। काव्यशास्त्रमिदमतीव विस्तृतं वर्तते। विवेचनस्य स्तरोऽपि नितान्तं प्रौढः। कामराजदीक्षितविरचितस्य काव्यशास्त्रग्रन्थस्यास्य नाम तत्तद्ग्रन्थालयसूचीषु मातृकासु एन.सी.सी. (N.C.C.) मध्ये च प्राप्ते विवरणे काव्येन्दुप्रकाश इति दरीदृश्यते। ग्रन्थस्यास्य काव्येन्दुप्रकाशः इति नाम किमर्थमिति विषये किञ्चिद् जानीमः। किं तावत् काव्यमिति विचारचर्चायामनेकानि काव्यलक्षणपुस्तकानि दृष्टिपथमवतरन्ति। तत्र विद्यमानस्य विषयस्य सम्यगवगमनाय नास्ति सरलो मार्गः सामान्यजनस्य। अत एव काव्यसम्बद्धविषयस्य सारल्येन अवगमनाय कामराजदीक्षितमहोदयेन काव्येन्दुप्रकाशाख्यो ग्रन्थो विरचितः। यथा चन्द्रः रात्रौ शीतलतारूपेण मन्दमन्दप्रकाशेन दिवसश्रमविकलितपुरुषस्य सर्वपीडां विनाश्य तस्मै सुखं प्रददाति, तथैव अन्यकठिनकाव्यग्रन्थ-पठनाद् भयाक्रान्तजनान् भयात् दूरीकृत्य काव्यसम्बद्ध-तत्त्वानां सारल्येन सुखेन सम्यगवगमनाय च ग्रन्थोऽयं विरचितः कामराज-दीक्षितमहाशयेन। अत एव काव्येन्दुप्रकाश इति नामकरणे महदौचित्यं वर्तते। काव्येऽस्मिन् स्वयं कामराजदीक्षित-महाशयेनापि उक्तम् -

**काव्येन्दोः प्रथमा तत्र काव्यलक्षणसंज्ञिता**
**कविधर्मोऽर्थनिष्पत्तिः समस्या व्यञ्जना तथा।।**
**छन्दश्चित्रं रीतिदोषगुणालङ्कृतयस्तथा।**
**रसभावौ वृत्तिरेवं नाट्यालङ्कृतिमोक्षकौ।।**
**हिमांशोरिव विज्ञेयाः कलाः षोडशसंख्यया।।**

**ननु किमिदं काव्यत्वमदोषत्वं वा सगुणत्वं वा रसवत्वं वा सालङ्कारत्वं वा सव्यंग्यत्वं वाऽर्थवत्वं वा रमणीयार्थप्रतिपादकशब्दत्वं वा लोकोत्तरवर्णना-निपुणकविकर्मत्वं दोषसामान्याभाववत्वं वा।**

अनेन स्पष्टं भवति यत् यथा चन्द्रः स्वकीयषोडश-कलाभिः षोडशकिरणैः जनमनांस्याह्लादयति प्रकाशयति च तथैव ग्रन्थोऽयं स्वकीयषोडशकलोल्लासेषु वर्णितषोडश-काव्यतत्त्वैः सामान्यविशेषजनमनांस्याह्लादयति प्रकाशयति च।षोडशकाव्यतत्त्वानि एतानि सन्ति –

१ काव्यलक्षणम् २ कविधर्मः ३ अर्थनिष्पत्तिः ४ समस्या ५ व्यञ्जना ६ छन्दः ७ चित्रम् ८ रीतिः ९ दोषाः १० गुणाः ११ अलङ्काराः १२ रसाः १३ भावाः १४ वृत्तिः १५ नाट्यम् १६ अलङ्कृतिमोक्षकौ

अत एव वक्तुं शक्यते यत् काव्यशास्त्रस्यास्य निर्माणं ग्रन्थकारेण काव्यशास्त्रलक्षणसम्पन्नं काव्यशास्त्रमिदं बाल-प्रौढ-वृद्ध-सामान्य-जनानां चित्तमाह्लादयिष्यतीति विश्वासेन रचितम्। काव्यशास्त्रस्यास्योपरि ममापि शोधकार्यं विदुषां मोदाय भाविसन्ततेरुपयोगाय च भविष्यतीत्यत्र नास्ति संशीतिः।

**उद्देश्यम् –**

सर्वस्यास्याः पाण्डुलिपेः सम्यगध्ययनं पुनरवतारणं च कृत्वा सम्पादनमस्माकमुद्देश्यम्। तदनन्तरं ग्रन्थे विवेचितानां विषयाणां समीक्षणम्, अन्येषां काव्यशास्त्रग्रन्थानां तुलनायां ग्रन्थस्यास्य को विशेष इति प्रतिपादनं चाप्यत्र करिष्यते।

शोधकर्त्री, साहित्यविभागः
ज.रा.रा.सं.वि.वि., जयपुरम्

**पुत्रिकासमीक्षा**

# गुर्जरेभ्यः प्रारब्धं नूतनत्रैमासिकम्

❑ **देवर्षिकलानाथशास्त्री**

सुमहत् प्रमोदप्रदमिदं वृत्तं यद् गुर्जरप्रदेशादेकमपरं संस्कृतत्रैमासिकं प्रकाशमायाति।यथा ''नन्दनवनकल्पतरुः'' ''निःश्रेयसम्'' इत्यादिनामवहानि संस्कृतपत्राणि गुर्जरभूमे र्जिनशासनश्रद्धापराणां मुनिवर्याणां सारस्वतसाधनायाः प्रसादरूपेण प्रकाश्यन्ते, तथैव ''सेतुबन्धः'' इत्याख्यं संस्कृतत्रैमासिकमपि अहमदाबादस्थ साबरमतीस्थलात् सपद्येव प्रारब्धम् कतिपयसूरीश्वरैः सेतुबन्धस्य प्रवेशाङ्कः (प्रथमाङ्कः) आश्विनपूर्णिमायां प्राकाशि यत्र संस्कृतसर्जना-कुशलैर्जैनमुनिभिः प्रणीता बोधकथाः, तत्त्वविवेचका लघुलेखाः, पूर्वसूरीणां ग्रन्थेभ्यः सङ्कलिता आलेखाः, उपदेशवाचश्च मुद्रिताः सन्ति। धर्मस्य सेतुरेव मानवानुद्धरति, अतः अध्यात्मसेतुः, संवेदनासेतुः, कथासेतुः, जीवनसेतुः, तत्त्वसेतुः, रहस्यसेतुः इत्यादिस्तम्भसूचकवर्गीकरणद्वारा लेखानां विषयवैविध्यं सूचितमस्ति सम्पादकप्रवरैः। गुरुकुलवासिनामनुशासनमार्गदर्शनायाचार्यश्रीउमास्वाति-वर्याणां तत्त्वार्थभाष्यादपि विषयविशेषा उद्धृताः सन्त्यत्र, धार्मिकभ्रमणरूपाया विहारयात्राया अपि किञ्चिद्वर्णन-मस्त्यत्र। नूतनपद्यरचना अप्यनुष्टुप्प्रभृतिच्छन्दःसु प्रकाशिताः सन्ति। यत्र कुत्रचन छन्दःशैथिल्यं, व्याकरणशैथिल्यं वा विरलरूपेण प्रकटीभवेत्तदपि परिष्करिष्यतेऽचिरमेवेति स्पष्टमाशास्यते। सूरीश्वराणां कृपया प्रारब्धस्यास्य त्रैमासिकस्य हार्दं स्वागतमाचक्ष्महे, सविनयमभिनन्दनवचांसि च प्रेषयामो गुर्जरभूमेस्तपागच्छाचार्यमार्गानुयायिनां प्रेमसूरीश्वर-भुवनभानु-सूरीश्वर-जयघोषसूरीश्वर-महाबोधिसूरीश्वर-रश्मिरत्न सूरीश्वर-प्रभृतीनां कृते।

**सेतुबन्धः** (संस्कृतत्रैमासिकम्) : सम्पर्कसेतुः प्रियंक शाह, C/o. 16 तीर्थभूमि अपार्टमेन्ट, सर्वोदय सोसाइटी, म्युनिसिपल स्कूल के सामने, अचेर, साबरमती, अहमदाबाद पृ.सं. 50, मू. 60/-

पुस्तकसमीक्षा

# श्रीरामानन्दाचार्यचरिताख्यायकं ग्रन्थद्वयम्

❑ देवर्षि कलानाथशास्त्री

भारते भक्तिधारायाः प्रवाहेतिहासे वैष्णवसम्प्रदाय-प्रवर्तकानामाचार्याणां श्रीरामानुज-मध्व-निम्बार्क-वल्लभादीनां नामानि यथा सुप्रथितानि तथैव श्रीरामानन्द-चैतन्यादीनां नामान्यपि सुतरामजरामराणि। श्रीरामानुजमध्वादिभिः श्रीविष्णोराराधनामार्ग उपदिष्टः, निम्बार्क-वल्लभ-चैतन्यादिभिः श्री विष्णोरेव स्वरूपमाविष्कुर्वतः श्रीकृष्णस्य भक्ति-रुपदिष्टा, श्रीरामानन्देन श्रीविष्णोः पूजाऽऽराधनादिकार्यस्यालम्बनरूपेण श्रीविष्णोरेव परमावतारः श्रीरामोऽवलम्बितः, रामभक्तेः प्रचारं कुर्वता तेन भक्तिमार्गस्येतिहासे या नवीना धारा प्रवाहिता तस्या विशिष्टं स्थानमस्ति यतो हि भारतस्योत्तर-पश्चिम-पूर्व- प्रान्तेषु हिन्दीभाषित्वेन प्रसिद्धे क्षेत्रे रामभक्तेः सुमहान् प्रसारो रामानन्दस्यैवावदानं मन्यते। प्रयागे लब्धजन्माऽयं रामानन्दः वि. सं. 1356 तः 1526 सं. पर्यन्तं भारतं पावयामास, कबीर-रैदास-धन्नाप्रभृतीन् शिष्यान् समाजहिताय प्रैररित्। आचार्यस्यास्य प्रधानपीठं पञ्चगङ्गाख्यं वाराणस्यामस्ति, बहून्यन्यानि पीठानि देशे प्रसृतानि, अस्य प्रधानशिष्याः 12 द्वाराचार्याः शतशः प्रशिष्याश्च सुप्रथिताः। शताब्दीपञ्चकाद्रामानन्दसम्प्रदायो देशे प्रामुख्यमवलम्बते अस्य भक्तानां गाथाः ''भक्तामाला'' दि हिन्दीकाव्येषु विपुलपरिमाणे प्राप्यन्ते किन्तु यथा शङ्कराचार्यादीनां वृत्तानि शङ्करदिग्विजयादिकाव्यरूपेण संस्कृते सुप्रथितानि तथा रामानन्दाचार्याणां वृत्तं संस्कृते नाऽभूदुप-लब्धम्। अतः 1871 ई. वर्षे लब्धजन्मना सुप्रथितेन सकलशास्त्रनिष्णातेन राष्ट्रभक्तेन, महात्मगान्धिनो राष्ट्रीयान्दोलनस्येतिहासं ''भारतपारिजात-पारिजातसौर-भादिसंस्कृतमहाकाव्यचतुष्टये निबद्धवता श्रीभगवदाचार्येण (1878 ई-1978 ई.) श्रीरामानन्दाचार्यस्य जीवनवृत्तं'' ''श्रीरामनन्ददिग्विजय'' शीर्षकवहे महाकाव्ये विंश्यां शताब्द्यां समुपनिबद्धम्।

इदं महाकाव्यं विंशतिसर्गेषु श्रीरामानन्दाचार्याणां जीवनवृत्तमाख्याति। एतस्यानन्तरं जयपुरनगर्या-विद्वत्प्रवरेण गद्य-पद्यादिप्रणयनधुरन्धरेण गोस्वामि श्रीहरिकृष्णशास्त्रिणा प्रौढे, प्राञ्जले च संस्कृतगद्ये श्रीरामानन्दाचार्याणां जीवनवृत्तं, सम्प्रदाय सिद्धान्ताश्च विंश्याः शताब्द्या उत्तरार्धे समुपनिबद्धाः। ''आचार्यविजय'' शीर्षकवहोऽयं विशालो गद्यग्रन्थो मूलतः 1977 ई. वर्षेऽयोध्यातः प्राकाश्यत, सम्प्रति च दुष्प्राप्यत्वमापन्नः। हर्षस्यायं विषयो यद्रामानन्दाषर्याणां वृत्तं भक्तिसिद्धान्ताश्च प्रख्यापयदिदं ग्रन्थद्वयं जयपुरात् हिन्द्यनुवादसहितं नूतनतया प्रकाशमानायितं राजस्थानसंस्कृत-साहित्यसम्मेलनस्य प्रयासेन। ''आचार्यविजयस्य'' हिन्द्यनुवादः पूर्वमपि रेवासापीठाधीशैः डॉ. राघवाचार्यैः सन् 2011 ई. वर्षे प्रकाशमानायितोऽभूद् यस्तत्प्रेरितैः कतिपयै-र्विद्वद्भिः कृतोऽभूत्। हिन्द्यनुवादसहितस्य आचार्यविजय-गद्यग्रन्थस्यापि प्रकाशनं 2011 ई. वर्षे तैः कारितमभूत्। सम्प्रति जयपुरीयेण कविवरेण पं. साँवरमलशास्त्रिणा विहितेन हिन्द्यनुवादेन, कथासारेण च सहायं ग्रन्थः प्राकाश्यमायातः। जयपुरीयेण कविवर्येण पं. सत्यनारायणशर्मश्रोत्रियेण भगवादाचार्यविरचितस्य श्रीरामानन्ददिग्विजयस्य व्रजभाषा-हिन्दीपद्यानुवादो विहितः, स च मूलकाव्येन सह सम्मेलनेन सपद्येव प्रकाशित इत्यपि हर्षास्पदम्। इत्थं रामानन्दाचार्यचरित्रं वर्षेऽस्मिन् ग्रन्थद्वये प्रकाशितमिति सूचयन्तः प्रमोदामहे।

जयपुरे जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृत-विश्वविद्यालयः स्थापितोऽस्ति, वर्षदशकाधिकात् कालादयं कार्यरतोऽस्ति, इदमपि कारणमेकं यज्जगद्गुरुरामान्दाचार्य-विषयिणी जिज्ञासा, ग्रन्थलेखनादिकं च प्रोत्साहनमभ्युप-गच्छति। प्रसङ्गेऽस्मिन् ग्रन्थद्वयस्यास्यापि स्वागतमाचक्ष्महे। स्वामिश्रीभगवदाचार्याणां रामानन्ददिग्विजयमहाकाव्यं 20

सर्गेषु संस्कृतच्छन्द:सु रामानन्दाचार्यजीवनवृत्तं यथोपनिबध्नाति तस्य मूलपाठ:, हिन्दीगद्यानुवाद: पं. सत्यनारायणश्रोत्रियकृतो हिन्दीपद्यानुवादश्च पाठकानां सौकर्याय सिध्येत्। प्रमुखतो दोहाच्छन्दसि पं. श्रोत्रियेण प्रतिपद्यमेकेन पद्येनाऽयं काव्यानुवाद: प्रणीतोऽस्ति। हिन्द्यनुवाद: ''भावार्थ'' इतिनाम्ना मुद्रित:, तदनु प्रतिपद्यं दोहापद्यानुवाद:।

अपरस्मिन् आचार्यविजयग्रन्थे विद्वद्वर्येण गोस्वामि-श्रीहरिकृष्णशास्त्रिणा (1906-1979, जयपुरे) 59 विशालेषु परिच्छेदेषु प्रौढे संस्कृतगद्ये रामानन्दजीवनं, तस्य देशयात्रा: उपदेशा:, सिद्धान्ता:, प्रमाणानि, शिष्यपरम्परा च यथा वर्णिता:, सर्वं तद्विदुषां मनोहारि, संग्रहणीयं चेति तु स्पष्टमेव। अयमपि ग्रन्थ: साँवरमलशास्त्रिकृतहिन्दीगद्यानुवादसहित: पाठकानुप-करिष्यति। अत्र हि पूर्वं तस्य तस्य प्रघट्टकस्य (गद्यांशस्य, ग्रन्थभागस्य) मूलपाठस्तदनु हिन्द्यनुवाद: प्रकाशितोऽस्ति। ग्रन्थद्वयेऽपि परिचायिका विमर्शवहाश्च भूमिका अपि मुद्रिता:, सन्देशा अपि, सम्पादकीयनिवेदनादिकमपि।

**श्रीरामानन्ददिग्विजय:** प्रणेता श्रीभगवदाचार्य:, पद्यानुवाद: पं. सत्यनारायणश्रोत्रिय: पृ.सं. 440 मू. 1100/-

**आचार्यविजय:** प्रणेता गोस्वामीहरिकृष्णशास्त्री, हिन्द्यनुवाद: पं. साँवरमलशास्त्री, पृ.सं. 890 मू. 2500/-

द्वयोरपि प्रकाशक: राजस्थानसंस्कृत साहित्य सम्मेलन, शाहपुराबाग, आमेररोड, जयपुर

## डॉ. हर्षदेव-माधवाभिनन्दनग्रन्थ:

संस्कृतसर्जनक्षेत्रे प्रयोगधर्मिताया नवोन्मेषस्य च पर्यायत्वेन प्रसिद्ध: कवि: डॉ. हर्षदेवमाधव: स्वकीयस्यायुष: षष्टिवर्षपूर्तिमाप्तवानिति मङ्गलावसरस्य स्वागताया-ऽभिनन्दनाय च तत्स्नेहिभिरभिनन्दनग्रन्थ एक: सपद्येव प्रकाशित इति प्रमोदकरं वृत्तम्। ग्रन्थेऽस्मिन् भारतविख्यातानां विदुषां, शोधार्थिनां साहित्यसर्जकानां च पञ्चाशल्लेखा: (संस्कृते, हिन्दीभाषायामङ्गलभाषायां च) प्रकाशिता: सन्ति येषु डॉ. माधवस्य समग्रकृतित्वविशेषा अपि विवेचिता:, तत्तत्कृतिगता विशेषा अपि, नूतनविधानामुल्लेखपुरस्सरं तासु विधासु रचिता: कृतयोऽपि सूचिता:। यैर्लेखा न लिखितास्तै: प्रशस्तिपरा: काव्यरचना: प्रेषिता:। लेखेत्रयं संस्कृते, लेखदशक-माङ्गलभाषायां, 32 लेखा हिन्द्याम्, प्रशस्तित्रयं च संस्कृतपद्यरूपेणास्मिन् ग्रन्थेऽवलोक्यन्ते। माधवसुतस्य ऋषिराजजानीत्याख्यस्य सर्जनमुद्दिश्यापि लेखद्वयं प्रकाशितमस्ति।

ग्रन्थेऽस्मिन् प्रकाशितेषु लेखेषु डॉ. हर्षदेव-माधव-कृतित्वविश्लेषणमिषेण विद्वत्प्रवरैराधुनिक-संस्कृतसाहित्ये प्रसृतस्य नूतनविधागतसर्जनस्य, आधुनिकसाहित्यकाराणां विभिन्नदिक्सूचकानां प्रवृत्तिविशेषाणां च गभीरं समीक्षणगर्भं विवेचनमप्युपलभ्यते इति ग्रन्थस्योल्लेखनीयो विशेष:। अत एव न केवलमयमभिनन्दनग्रन्थोऽपितु वर्तमानयुगीयसंस्कृत-सर्जनस्य नूतनानां दिशां विवेचको विमर्शग्रन्थोऽप्यस्तीति स्पष्टीकर्तुमिवास्य ग्रन्थस्य शीर्षक प्रकाशकैर्मुद्रितमस्ति ''आधुनिक संस्कृत की नई दिशाएँ''। आनुषङ्गिकं शीर्षकमिदमपि सहैव मुद्रितमस्ति- डॉ. हर्षदेवमाधव अभिनन्दनग्रन्थ।

षष्टिपूर्ते: शुभावसरे हार्दिकान्यभिनन्दनवचनानि प्रदीयन्ते डॉ. हर्षदेव माधवाय, स्वागतं च व्याह्रियते ग्रन्थस्यास्य भारती परिवारेण।

आधुनिकसंस्कृत की नई दिशाएँ (डॉ. हर्षदेवमाधव अभिनन्दनग्रन्थ) मुख्यसम्पादक: डॉ. अशोक पटेल, डॉ. रवीन्द्रकुमार खण्डावाला, डॉ. प्रवीण पंड्या प्रका. पार्श्व पब्लिकेशन, 102 नन्दनकॉम्प्लेक्स, मीठाखली ग्राम, रेलवे फाटक के पास, अहमदाबाद-6 पृ.सं. 340 मू. 600/-.

# सर्वं सत्ये प्रतिष्ठितम्

❑ ममता गुप्ता

मानवधर्मः यैः गणैः पूर्णतां प्राप्नोति, तेषु सत्यमेव सर्वोपरि वर्तते। यद् वस्तु यादृशं यद्रूपेण च वर्तते, तस्य तथैव कथनं सत्यम् इति अभिधीयते। परमेश्वरेण जिह्वा सदुपयोगार्थं दत्ता, अतः जिह्वायाः सदुपयोगः सत्यभाषणेन कर्तव्यः। विश्वसाहित्यस्य प्राचीनतमग्रन्थः सत्यमेव केवलं निरूपयति–

''**एकं सद्विप्रा बहुधा वदन्ति**'' ऋग्वेद 1.164.46

सत्येन एव समाजस्य स्थितिः विद्यते। यदि सर्वे जनाः असत्यवादिनो भवेयुः तर्हि लोकस्य स्थितिः क्षणमात्रमपि भवितुं न शक्नोति। सत्यात्पराङ्मुखो जनो धार्मिको न भवति यतोहि विविधलक्षणलक्षितस्य धर्मस्य कारणं सत्यमेवास्ति। यथा पत्र-पुष्प-फल-स्कन्धादिभिः प्रतीयमानस्य वृक्षस्य मूलं तु बीजमेव। नहि बीजं विना धर्मः अत एव धर्मशास्त्रेषु मनसा वाचा कर्मणा च सत्यपालने निष्ठा प्रोक्ता। महाभारते एषा सूक्तिः सुप्रसिद्धा अस्ति यत् 'सत्यमेव जयते नानृतम्'।

भगवता श्रीकृष्णेन गीतायां सत्यस्य गणना वाक्तपसिच कृता। यथा–

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।**

श्रीमद्भगवद्गीता–17.15

ख्रीष्टधर्मसंस्थापकेन महात्मना ईसामहोदयेन अपि अस्य महत्वं स्वीकृतम्। पायथागोरसमहोदयोऽपि सत्यं ब्रह्मेति प्रतिजानीते- 'Truth is God'

महात्मा कबीरदासोऽपि सत्यं परं तप इति भणति। यत्र सत्यं तत्र ब्रह्मणोऽवस्थितिः

''**साँच बराबर तप नहीं, झूँठ बराबर पाप।**
**जांके हिरदै साँच है, ताके हिरदै आप।।**''

तुलसीदासोऽपि ''नहि असत्य सम पातक दूजा'' इति अभिदधान एतदेव समर्थयते। वान्समहोदयः सत्यं जगतः संस्थापकरूपेण गुरुत्वाकर्षणरूपेण च प्रतिपादयति–

"Truth is the gravitation principle of the universe by which it is supported and in which it inheres."

उपनिषत्सु अपि असत्यविषये कथ्यते–

''**सत्यं ब्रह्मेति, सत्यं ह्येव ब्रह्म**'' - बृहदारण्यक 5.4.1

''**सत्यं त्वेव विजिज्ञासितव्यम्**''- छान्दोग्योपनिषद् 7.16.1

मनुस्मृतौ धर्मलक्षणेषु सत्यस्य गणनास्ति। यथा –

**'धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।'**

मनुस्मृतिः-6.92

भारतीयवैज्ञानिकाः ऋषयः सत्यविषये कथयन्ति यत् आत्मनः स्वरूपमेव सत्यम्। ईश्वरः सत्येनैव जगतः निर्माणं करोति। पालयति च अन्ते सत्येन एव जगत् संहरति। इत्थं परमेश्वरस्य जगतः निर्माण-पालन-संहारकार्येषु सत्यमेव सहायकः भवति। स्वामिदयानन्देन कथितं- 'सत्याचरणमेव धर्मः। जगतः प्रतिष्ठा सत्यम्। विधानं साधनं वा सत्यम्। साध्यं सत्यम्'।

मनुना उक्तं यत् चित्तस्य चांचल्यमपनेतुं सत्यस्य महत्यपेक्षा। सत्येन मानसिकी शुद्धिः संजायते। यथा–

'**मनः सत्येन शुद्धयति**' मनुस्मृति- 5.109

शुद्धे आत्मनि यद् उत्पद्यते तत्सत्यम्। तदेव यदि अस्माकं बुद्धौ, मनसि, वचसि कर्मणि च समाविशेत्, तर्हि अस्माकं जीवनम् आनन्दमयं भवेत्। अतएव मानवैः सत्यपरायणं भवितव्यम्। सत्येनैव मानसं निर्मलं सम्पद्यते। सत्यस्य प्रतिष्ठया एव मानवस्य कल्याणं भवति। असत्यभाषणेन स्वस्य हानिः नाशश्च भवतः। समाजस्य देशस्य लोकस्य चासत्यभाषणेन नाशो भवति अतएव सत्याद् भिन्नः नास्ति कोऽपि धर्मः। कथितमपि–

**'नहि सत्यात्परो धर्मो, नानृतात् पातकं परम्।'**

भारतीयसंस्कृतेः विशेषतासु सत्यं प्रथमं परिगण्यते। ततः परम् अन्यानि तत्वानि समायान्ति। सत्यस्य पालने पूर्वं कष्टानि आगच्छन्ति, परन्तु यः धैर्येण तानि सहते, सः परिणामे अमृतं लभते। यथा राजा हरिश्चन्द्रः सत्यस्य रक्षणार्थं महर्षये

विश्वामित्राय स्वराज्यं समर्पितवान्, स्वपत्नीमपि विक्रीय स्वात्मानमपि चाण्डालगृहे दासीकृतवान्, अन्ते च स परमसत्यरूपं नारायणं साक्षात्कृतवान्। महात्मा तुलसीदासः ग्रन्थरत्ने रामचरितमानसे सडिण्डिममुद्घोषयति यत् सर्वाणि शोभनानि पुण्यानि सत्यमूलानि अतः मानवैः सत्यपरायणैः भवितव्यम्। कथितमपि –

**सत्यमूल सब सुकृत सुहाये।**
**वेद पुरान मुनीसन गाए।**

धर्मराजो युधिष्ठिरोऽपि सत्यभाषणस्य प्रभावादेव विजयम् अलभत, अतएव सत्यमेव मानवधर्मस्य आधारोऽस्ति। मनुना उक्तमपि –

**'धर्मः सत्येन वर्धते'** मनुस्मृति–8.83

न केवलं मानव एवापितु पशु-पक्षी-पर्वतादयोऽपि सत्यरक्षायां तत्परा आसन्। श्रूयते विन्ध्यगिरिः स्वगुरोरगस्त्यस्य वचनानुपालनाय विनतोऽभूत्, अद्यावधि च तथैवास्ति। महाशक्तयोऽपि सत्यमनुसृत्य स्वस्वकार्याणि कुर्वन्ति। कथितमपि केन –

**सत्येन सूर्यस्तपति पृथ्वी सत्ये प्रतिष्ठिता।**
**सत्येन वायवो वान्ति सर्वं सत्ये प्रतिष्ठितम्।।**

अद्य अस्माकं देशे सत्यस्य तत् महत्त्वं नास्ति यत् प्राचीनकाले अवर्तत। अधुना तु भारते असत्यभाषणे निपुणता एव दरीदृश्यते। तत्कालीनाः जनाः हृदयेन सरलाः, वचसा सत्यभाषिणः, व्यवहारेण च कुशलाः आसन्। वर्तमानकाले महात्मागाँधी सत्यस्य एव सदा शिक्षामददात्। सत्येन एव जीवनं साफल्यम् एति न असत्येन। यदि मानवः स्वजीवने सत्यस्याचरणं करोति तर्हि निःसन्देहं लौकिकं पारलौकिकम् अभ्युदयं प्राप्नोति अतएव सदैव सत्यपरायणैः भवितव्यम्। सत्यमेव साराख्यं वस्तु वर्तते। एवं च पुनः संसारस्य अन्यदेशवासिभिरपि अनुकरणीयः भविष्यति पुराकालवत्। यथोक्तम् –

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन पृथिव्यां सर्वमानवाः।।**

महाभारतस्य आदिपर्वेऽपि सम्यगेवोक्तं महर्षिणा वेदव्यासेन यत् –

**नहि सत्यसमो धर्मो न सत्याद् विद्यते परम्।**
**नहि तीव्रतरं किंचिदनृतादिह विद्यते।**

**शोधार्थिनी,** संस्कृतविभागः
डॉ. भीमराव अम्बेडकर राजकीय स्नातकोत्तर
महाविद्यालयः, श्रीगंगानगरम् (राजस्थानम्)

## अभिव्यक्तिपञ्चकम्

❑ **डॉ. कौशल तिवारी**

(1) स्फुटन्ति विविधकुसुमानि
सुशोभते सुरभारत्युद्यानम्।
सर्वत्र वर्तते मधु
हन्त ! न सन्ति रसिकषट्पदाः।।

(2) पञ्जरबद्धशुकोऽहं
न ज्ञातुं शक्नोमि स्वतन्त्रताम्।
यदाऽऽकाशं पश्यामि
तदा मम चित्तमुड्डीयते।।

(3) उदरे वस्त्रं बद्ध्वा
दर्शं दर्शं रिक्तभाजनानि च।
विदीर्णकम्बलेनैव
सोढा सा शीतत्रियामा।।

(4) सम्प्राप्य चैतन्यमपि
बत ! किं हस्तगतं कृतमस्माभिः।
कृष्णस्पर्शं लब्ध्वा
जयति स कनिष्ठिकाधिष्ठितः।।

(5) शिरःस्थकिरीटं नैव
पादयोस्त्वक्स्फोटान् पृच्छैतत्तु।
लक्ष्यं प्राप्तुमिह मया
किं सोढं वा किं कृतं वा।।

मालादेवी मोहल्ला,
वार्ड नं. 36, बारां,
राजस्थान–05

# पुराणेषु दानस्य महत्त्वम्

❑ प्रतिभा शर्मा

दान शब्द: 'दा' दाने 'दो' अवखण्डने 'दैप' शोधने इत्येतेभ्यो धातुभ्यो 'ल्युट्' प्रत्यये कृते सति निष्पद्यते। एवम् प्रकारेण 'दानम्', 'खण्डनम्', 'शोधनम्' इत्येते त्रयोऽर्थाः कर्तुं शक्यन्ते। व्यवहारतः दानार्थे शब्दोऽयमधिकः प्रयुक्तोऽस्ति। सर्वप्रकारकं देयत्वं 'दान' शब्दः न परिभाषते। यदा स्वत्वस्य निवृत्तिः भवति तदा दानक्रिया सम्पूर्णतां प्राप्नोति। अस्माकं संस्कृते दानस्य महती आवश्यकता वर्तते, यतोहि लौकिकजीवने पुरूषार्थचतुष्टयप्राप्तिः परमोद्देश्यं भवति। पुरुषार्थेषु धर्म एव प्रथमः पदार्थः तदनन्तरम् अर्थकामौ सिद्ध्यतः, ततश्च मोक्षं प्राप्यते। लौकिकजीवने दानस्य महिमा को न जानाति ? गृहस्थजीवने तु आवश्यकं कर्त्तव्यं विद्यते 'दानम्'। प्रश्नोऽयं मनसि उत्पद्यते यत् किं नाम दानम् ? अस्याः परिभाषाया मुख्यं तत्त्वं वर्तते - स्वाधिकारस्य निवृत्तिः। दानक्रियायाः पूर्णताया कृते इदमावश्यकमस्ति यत् स्वत्वस्य निजस्य वा भावनायाः निवृत्तिः, परस्वत्वस्य च उत्पत्तिः। यदा प्रसादाभिव्यक्तये, भीत्या, उपहारप्रदानेन वा यत्किञ्चिदपि प्रदीयते अन्येन तदा क्वापि लोकोपकारि भावना नास्ति। तत्र तु आधुनिकपरिवेशानुसारेण मान्यतानुसारेण उपहाराः प्रदीयन्ते। यदा कस्मैचित् उपयुक्तपात्राणि स्वीयं मत्वा कर्तव्यकर्मानुसारेण यत्किमपि प्रदीयते तर्हि तद् कार्यं दानमिति नामधेयम्। मनुना उक्तम्-

**श्रद्धयेष्टं च पूर्वं च नित्यं कुर्यादतन्द्रितः।**
**श्रद्धाकृते ह्यक्षये ते भवतः स्वागतेर्धनैः।।**
**दानधर्मं निषेवेत नित्यमैष्टिकपौर्तिकम्।**
**परितुष्टेन भावेन पात्रमासाद्य शक्तितः।।**

**असत्कृतमवनातं तन्नाम समुदाहृतम्।।**

दानकृते सत्पात्रस्य अनिवार्यता अपेक्षिता वर्तते। यतोहि अपात्रेभ्यः दत्तस्य दानस्य निष्फलता अनर्थफलता च वर्णिता।

**दानधर्मं निषेवेत पात्रमासाद्य शक्तितः।**
**उत्पत्स्यते हि तत्पात्रं यत् वारयति सर्वतः।।**

दानस्य पात्रताविषये पद्मपुराणस्य भूमिखण्डे सम्यग्वर्णनं प्राप्यते येन विप्राय दानस्य पात्रता ज्ञाप्यते-

**ब्राह्मणं सुकुलोपेतं वेदाध्ययनतत्परम्।**
**शान्तं दान्तं दयोपेतं शूद्रमेव विशेषतः।।**

अग्निपुराणे दशप्रकाराणि सन्ति दानकर्माणि-

**कनकाश्वतिला नागादासीरथमहीगृहाः।**
**कन्या च कपिला धेनुः महादानानि वै दश।।**

सनातनधर्मे दानोचितान् पुण्यकालान् आश्रित्य नैके नियमाः विहिताः सन्ति। नैकानि दानकर्माण्यतिरिच्य विशेषोपलक्ष्येषु विहितानि नैमित्तिकानि दानकर्माणि अधिकं सफलानि पुण्यप्रदानि चाभिमन्यन्ते यथा-

**अयने विषुवे चैव षडशीतिमुखेषु च**
**चन्द्रसूर्योपरागे च दत्तमक्षय्यमुच्यते।।**

अग्निपुराणे तु विशिष्टास्तिथयः, युगादिः, मन्वन्तरादिः अयने, सूर्यग्रहणं, चन्द्रग्रहणं, व्यतीपातः इत्यादयः कालाः दानकर्माणि निर्दिश्यन्ते-

**अयने विषुवे पुण्ये व्यतीपाते दिनक्षये।**
**युगादिषु च संक्रान्तौ चतुर्दश्यष्टमीषु च।।**
**सितपञ्चदशी सर्वद्वादशीस्वष्टकासु च।**
**यज्ञोत्सवविवाहेषु तथा मन्वन्तरादिषु।**
**वैधृते दृष्टदुःस्वप्ने द्रव्य ब्राह्मणलाभतः।।**

यद्यपि दानानि विविधप्रकारकाणिः भवन्ति। दानकर्मणि यानिकानि वस्तूनि प्रदेयानि तानि सर्वाण्यपि

विधिविधानपूर्वकं प्रदातव्यानि। तदैव दानस्य सम्पूर्णफलानि प्राप्नुवन्ति दानदातारः। अग्निपुराणे दानरीत्या सम्यगनुवदन्ति। यथा पूर्वाभिमुखं भूत्वा दानं देयम्।

पौराणिकधर्मे शास्त्रीयविषयेऽपि दानधर्मस्य कृते अन्यतमं स्थानं विद्यते। सकलपुराणेष्वपि दानमहिमा प्रतिपादितोऽस्ति। तेष्वपि अग्निपुराणे, मत्स्यपुराणे वराहपुराणे, पद्मपुराणे, कूर्मपुराणे च दानस्य वर्णनं प्राप्यते। महाभारते दानादिक्रियायाः सङ्केतः प्राप्यते अनुशासनपर्वे विशेषरूपेणापि। निबन्धग्रन्थेष्वपि यथा 'चतुर्वर्ग-चिन्तामणि' 'दानक्रिया कौमुदी' 'दानमयूख' दानसागर-दान प्रकाशादि बहु प्रसिद्धाः सन्ति।

वैदिकसाहित्ये दानस्योल्लेखः प्राप्यते। ऋग्वेदे विविधदान विषयकाः प्रसङ्गाः सन्ति यथा गोदानं, अश्वदानं, उष्ट्रदानं, अन्नदानञ्च। ऋग्वेदे लिखितमस्ति-

**उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सहते सूर्येण।**
**हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्रतिरन्तः आयुः।।**
**दक्षिणावं दक्षिणां गां ददाति दक्षिणं चन्द्रमुत यद्धिरण्यम्।**
**दक्षिणान्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानर।।**

ऐतरेय ब्राह्मणेवपि दानस्य वार्ता मिलति यस्मिन् स्वर्णदान-भूमिदान-पशुदानादि निर्दिश्यन्ते। छान्दोग्यो-पनिषदि जनश्रुत्या संवर्गविद्याध्ययनकारणाद् रैक्वाय सहस्ता धेनवः स्वर्णमुद्रा, कन्या, ग्रामाश्च प्रदत्ताः।

मनुस्मृतौ कलियुगे दानमेव धर्मः स्वीक्रियते-

**तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते।**
**द्वापरे यज्ञमेवाहुर्दानमेके कलौ युगे।।**

पौराणिककोषे त्रिप्रकारकाः दानधर्माः यथा ज्येष्ठ-कनिष्ठ मध्यमाः च। ज्येष्ठदानात् मोक्षं कनिष्ठदानात् स्वार्थसिद्धिं प्राप्नोति। दानस्य उपयुक्तपात्रेषु दयासंयुक्तः भूत्वा मध्यम दानं भवति। भगवद्गीतायामपि प्रोक्तं-

**दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।**
**देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्।।**
**यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।**
**दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्।।**

आदेशकाले यद्दानमपात्रेभ्यश्च दीयते। उत्तराभिमुखी भूत्वा दानञ्च प्राप्नुयुः। एतादृशः दानी दीर्घायुः भवेत्।

**दद्यात्पूर्वमुखो दानं गृह्णीयादुत्तरामुखः।**
**आयुर्विवर्धते दातुर्ग्रहीतुः क्षीयते न तत्।।**

दानकाले प्रोक्तानि च

1. "अधसोमार्क ग्रहणसंक्रान्त्यादौ च काले गङ्गाप्रयागादौ तीर्थदेशे महागुणे।

2. तथा चामुकगोत्राय तथा चामुकशर्मणे, वेदवेदाङ्गयुक्ताय पात्राय सुमहात्मने।

3. यथानाम महाद्रव्यं विष्णुरुद्रादिदैवतम् पुत्रपौत्र ग्रहैश्वर्य-पत्नीधर्मार्थसद्गुणाकीर्तिविद्यामहाकामसौभाग्यारोग्य वृद्धये सर्वपापोपशान्त्यर्थं स्वर्गाय भुक्ति-मुक्तये।"

एतदनन्तरं दक्षिणा प्रदातव्या इति। एवं प्रकारेण कथयितुं शक्यते यदस्माकं संस्कृतौ दानकर्मणः महती आवश्यकता वर्तते यतोहि दानात् ऋते धर्मप्राप्तिः सम्भवा नास्ति। अत्र दानाद् विना जीवने धर्मस्वरूपं न दरीदृश्यते। यदा लौकिकजनाः पुण्यकर्मविषये वार्तां कुर्वन्ति तत्तु ते अनिवार्यरूपेण कथयन्ति

**दानधर्मान् प्रवक्ष्यामि भुक्तिमुक्तिप्रदान्शृणु।**
**दानमिष्टं तथा पूर्तं धर्म्मं कुर्वन्हि सर्वभाक्।।**

पुरुषार्थचतुष्टय प्राप्तिकरणे दानस्य महती भूमिका भवति इत्यस्याधारेण उपर्युक्त विवेचनं मया विशदीकृतम्।

**शोधच्छात्रा**
रा.सं.सं., जयपुरपरिसरः
(साहित्य शास्त्र विभागतः)


# अस्माकं लोकदेवता-गोगाजी

❑ परमानन्द शर्मा ''प्रमोदः''

भारतीयसंस्कृतेः रक्षणाय यथाकालं वैदेशिकेभ्यो युद्धानि अभवन्। बहुषु युद्धेषु अनेके वीरा आत्महुताः। तेषु गोगदेवोऽन्यतमः। गोगदेवः चौहानवंशे भाद्रपदमासे कृष्णपक्षे नवम्यां तिथौ ९९२ तमे विक्रमाब्दे वर्तमानचूरू-जनपदस्य ददरेवा-ग्रामे जैवरसिंहस्य भार्यायाः 'बाछलदे' इत्यस्य कुक्षौ अजायत। एका जनश्रुतिरस्ति यत् कृते प्रयत्नेऽपि बहुकालं यावद् बाछलदे कामपि सन्ततिं न प्राप्तवती तदा सा गुरुगोरक्षनाथस्य शरणमागता।


गुरुगोरक्षनाथः महान् योगी आसीत्। सः तस्यै एकं गुगलनाम-फलम् अयच्छत्। सा तत् फलम् अभुञ्जीत् तेन प्रभावेण सा गर्भवती जाता। इत्थं गोरक्षनाथस्य कृपया एव सा पुत्ररत्नम् प्राप्नोत्। गुगलफलाधारेणैव तस्य बालकस्य नाम गोगदेवः इत्यभवत्।

गोगदेवस्य वंशविषये प्रामाणिकतायाः अभावोऽस्ति प्राप्तविवरणानुसारेण चौहानवंशे रत्नसेनो नाम शासकः अभवत्। तस्य पुत्रो वीरमरावः। वीरमरावस्य त्रयः पुत्राः आसन्। तेषु ज्येष्ठः सांवतसिंहः द्वितीयः सवलसिंहः कनिष्ठश्च अचलसिंहः। सांवतसिंहस्य मेलसिंहः तस्य च घंघराजः, येन घंघरानामकस्य ग्रामस्य स्थापना कृता। घंघराजस्य इन्द्रचन्द्रः तस्य पुत्रश्च हरकणः (हरकर्णः) आसीत्, हरकर्णस्य द्वौ पुत्रौ हर्ष-कान्हाराजौ तथा चैका जीणबाई-नाम पुत्री आसीत्। कान्हराजस्य अमराजः (अमरराज.) अमराजस्य जीवराजः (जेवरः झैवरःवा), जेवरस्य पुत्रः गोगदेवः आसीत्।




केचन वदन्ति यद् घंघराजस्य भार्ये द्वे आस्ताम्। ज्येष्ठभार्यातः सन्ततित्रयम् आसीत्। तेषु हर्षहरकर्णौ पुत्रौ जीणबाई नाम पुत्री चासीत्। अपरपत्नीतः त्रयः पुत्राः आसन् तेषु ज्येष्ठः कान्हराजः मध्यमः चन्द्रराजः कनिष्ठश्च इन्द्रराजः। कान्हराजस्य चत्वारःपुत्राः तेषु ज्येष्ठः अमरराजः (अमराजः) द्वितीयः अजयराजः (अजराजः) तृतीयः सिद्धराजः चतुर्थश्च बच्छराज, (वत्सराजः) आसीत्। अमरराजः स्वभ्रातृणां कृते घांघु-नामकं ग्रामं त्यक्त्वा ददरेवा-नामकं ग्रामं राजधानीं चकार। अमरराजस्य पुत्रः, जीवराजः (झेवरः) आसीत्। झेवरस्य भार्या बाछलदे आसीत्। 'बाछल' दे इत्यस्य कुक्षेः

गोगदेवः अजायत। गोगदेवः जन्मना एव ईशानुरागी मेधावी चासीत्। पुनश्च गोरक्षनाथस्य शिष्यत्वेन योगसाधनामपि शिक्षितवान्।




यदा गोगदेवः किशोरवयसि आसीत् तदा झेवरसिंहः स्वसाम्राज्यविस्ताराय उत्तरक्षेत्रे आक्रमणम् अकरोत् किन्तु युद्धेऽस्मिन् स दिवङ्गतः। तस्य विजयाभियानम् अवरुद्धं जातम्। अनन्तरं बाछलदेव्याः संरक्षणे गोगदेवः ददरेवायाः नृपोऽभवत्।

गोगदेवस्य द्वे भार्ये आस्ताम्। ज्येष्ठा केलमदे या कोलुमण्डस्य राजकुमारी आसीत्। कनिष्ठा च सुरियलः आसीत्। केचन वदन्ति यद राज्ञी केलमदे पाबुदेवस्य सहोदरस्य बूडों इत्यास्य पुत्री आसीत्। किन्तु काल-भेदकारणात् सत्यं न प्रतीयते वृत्तमेतत्। राज्ञी सुरियलः कामरूपदेशस्य राजकुमारी आसीत्। गोगदेवस्य नानकः नाम पुत्रः आसीत्।

गोगदेवस्य मातृष्वसा आसीत् आछलदे। साऽपि चौहानवंशे इन्द्रराजस्य प्रपौत्रवधू आसीत्। तस्याः अर्जन-सर्जनौ द्वौ पुत्रौ आस्ताम्। तौ जोडी-नामकस्य ग्रामस्प ग्रामाधिपती आस्ताम्। एकदा तौ 'ददरेवा-ग्रामोऽस्माकं हस्तगतो भवेदिति विचार्य गोगदेवस्य गवामचोरयताम्। ततः गोगदेवेन साकं तयोः युद्धमभवत्। युद्धे अर्जनः ''खुड्डी'' नाम-ग्रामं निकषा जालवृक्षस्याधः दिवङ्गतः। तस्य समीपे एव स्थिते सरोवरतटे सर्जनोऽपि वीरगतिं प्राप्तवान्।

१०१८ तमे ख्रिस्ताब्दे यदा महमूदगजनवी सोमनाथ-मन्दिरं विलुण्ठ्य पुनः स्वदेशं गच्छन् आसीत् तदा गोगदेवः तस्य कृत्यं विलोक्य अतिक्रुद्धोऽभवत्। सः स्वबान्धवान् पुत्राञ्चाहूयोक्तवान् यदेकेन वैदेशिकेनास्माकं सोमनाथमन्दिरं ध्वस्तं कृत्वा अस्माकं राष्ट्रियसम्पदां विलुण्ठ्य भारतीयान् विधात्य निर्भयेन गम्यते। वयं च मूकदर्शकाः भवाम इति नोचितम्। अतः यावत् प्राणाः सन्ति तावत् तेन सह युद्ध्वा ससैन्यं तमन्तकपुरं प्रापयामः इति सर्वेषु हृदयेषु राष्ट्रभक्तिं प्रकाशयन् लघुबलं स्वीकृत्य युद्धार्थं प्रस्थितवान्।

यदा महमूदगजनवी मरुवने पथभ्रष्टोऽभवत् तदा पथ-प्रदर्शनव्याजेन गोगदेवः तस्य समीपं गत्वा आक्रमणम् अकरोत्। गोगदेवः वीरपुरुषः आसीत्। सः लघुबलं स्वीकृत्य यवनेन साकं युद्धं कुर्वन् शताधिकमुगलान् विदार्य लक्षाधिकसैनिकानां मनसि भयं जनयन् स्वमातृभूरक्षणाय १०२५ तमे ख्रिस्ताब्दे सपरिवारः वीरगतिं प्राप्तवान्।

यत्र गोगदेवः दिवङ्गतः तत्रैव तस्य समाधिः निर्मिता

अस्ति। एतत् स्थानं गोगामेडी इत्युच्यते। गोगामेडी इदानीं राजस्थानस्य हनुमानगढ़-जनपदे नोहर-तहसीले वर्तते।

गोगदेवः बाल्यकाले एव सर्पविषनाशनस्यालौकिकं शक्तिं प्राप्तवान्। किंवदन्ती अस्ति यद् विवाहात् पूर्वमेव केलममेकः नागः दंष्टवान्! तेन कुपितः गोगदेवः मन्त्रोच्चारणं कृतवान्। मन्त्रशक्तिप्राभावेण सर्वे नागाः उष्णतैलस्य कटाहे निपत्य नष्टा अभवन् तदा नागराजः वासुकिः स्वयमागत्य विषमवशोष्य तां पुनः स्वस्थां कृतवान्। अस्मात् कारणात् जनाः गोगदेवं सर्पविषहारकरूपेण जयन्ति।

गोगदेवं हिन्दवः मुस्लिमाश्च लोकदेवतारूपेण मन्यन्ते। गोगामेडी ददरेवा च स्थानद्वये संस्कृतिसौहार्द्रं प्रकटीकुर्वन्तः हिन्दवः मुस्लिमाश्च समानरूपेण श्रद्धावनताः दर्शनार्थं गच्छन्ति। तत्र मुस्लिमजनाः गोगदेवं गोगापीर जाहरपीर इति नाम्ना रक्षासूत्रं बध्नन्ति, तत गोगाराखडी इति कथ्यते। गोगदेवस्य स्थानं (थान) शमीवृक्षस्याधः भवति। गोगदेवः इदानीं प्रतिग्रामं लोकदेवतारूपेण जनमनसि विद्यमानः।

व्याख्याता (संस्कृते)
रा.उ.मा.वि. आगूँचा, जिला-भीलवाड़ा (राज.)

## बाबासाहेब आप्टेमहोदयानां व्यक्तित्ववर्णनम्-

# नौकायां जलम्

❑ वेणीमाधव धर्माधिकारी

गंगायास्तीव्रधारायां नौका प्रवर्द्धमाना आसीत्। गुमाईमहोदयश्च मध्यधारां विभेद्य नौकां उपतटम् आनेतुं पत्त्राघातं कुर्वन्नासीत्। अष्ट नवमाइलात्मकं मार्गमिदमुत्तरणीयमासीत्। तदैव सहसा नौकायामेकं छिद्रमभवत्। नौकायां तीव्रगत्या जलागमनमवलोक्य मम तु प्राणाः शुष्काः अभूवन्। तीव्रप्रवाहमय्या-गंगायाः प्रवाहे नौका सामान्येनैव दोलायमाना आसीत् सहैवेदं छिद्रमभवत्। मया एवं प्रतीयते स्म यत् दिनद्वय-रात्रिद्वयोरियं नौकायात्रा यदा समाप्तिप्राया तदैव पूर्णविरामं न गृह्णीयात्।

परं गुमाईमहोदयस्य विश्वासो विलक्षणः। पतत्रं चालयतैव गुमाई महोदयेन यथैव छिद्रतो जलागमन-मवलोकितं त्वरया स स्वशिरोबद्धं वस्त्रं निस्सार्य प्राक्षिपदवदच्च बलादिदं छिद्रे निवेश्य दृढम् अवरोधय व्याकुलतायाः कारणं नास्ति। आदेशानुसारमेव मया वस्त्रं निवेशितं, दण्डेन चावरुद्धम्। गुमाईमहोदयस्य सहचरो गणेशः सततमेव नौकातो जलं बहिः प्राक्षिपत्। एवं वयं किञ्चित्समयानन्तरमेव पटनानगरस्य महेन्द्रघट्टं सम्प्राप्ताः। शरीरे प्राणसंचारोऽभवत्। नौकातोऽवतीर्यास्माभिस्स-र्वैरेव गंगावन्दनं कृतम्।

आप्टेमहोदयः स्नेहवशात्तं गुमाईमहोदयं स्वसमीपे आह्वयत्। तं कण्ठे गृहीत्वा अमिलत्। स्वशिरसः कौशेयोष्णीशं तच्छिरस्यबध्नात्। आप्टेमहोदयानां कृतज्ञभावनया सः अत्यन्तं प्रसन्नोऽभूत्। बाबामहोदयं च प्रणनाम। एवं नवागस्ततः सप्तदशागस्तपर्यतं बाबा महोदयेन सह दरभंगातः पटनापर्यन्तं प्रवासः समभवत्। पूर्वनिश्चितकार्यक्रमानुसारमेव संघकायार्थमग्रेवर्द्धनस्य निष्ठेव संघकार्यप्रगतेः कारणम्। संघकार्यस्य पवित्रतायां विश्वासः कार्यपूर्त्तेः निश्चयस्य दृढता च संकटोल्लंघनशक्तिं प्रददाति। नान्यसाधनानीति प्रत्यक्षोदाहरणेन तैः प्रदर्शितम्।

ब्रह्मपुरी, जयपुर

# आदर्शसमाजस्य प्रतिबिम्बभूता रामायणकालीना नारी

❑ स्वाति जैनः

नारीणां परिस्थितयः कस्यापि सभ्यसमाजस्य सभ्यतायाः समीचीनः मापदण्डः वर्तते। रामायणे नारीणां स्थितीनां विभिन्नदृष्टिकोणेभ्यः मापनं सम्भाव्यते।

1. कन्यात्वम् 2. पत्नीत्वम्

3. मातृत्वञ्चेति नार्यः प्रमुखानि अङ्गानि वर्तन्ते।

1. कन्यात्वम् कन्यायाः जन्मसमये निःसन्देहं परिवारे प्रसन्नतारश्मिः प्रसृतवती भवति। परन्तु जन्मसमये एव तस्या भाविवैवाहिकचिन्ता पितृमनसि जायते।

उत्तरकाण्डे एतादृशानि विविधस्थलानि दृश्यन्ते यत्र कन्याशिशोः जन्मसमये तस्याः माता-पिता च चिन्तायुक्तौ अभवताम्। उदाहरणार्थं- वयं सीतायाः तत्कथनोपेक्षां न कर्तु शक्नुमः, यस्मिन् सा कथितवती मम विवाहयोग्यवयसि जाते मम पिता जनकः तथैव चिन्ताग्रस्तः आसीत् यथा कोऽपि निर्धनः स्वस्य स्वल्पसम्पत्तेः नाशकारणात् चिन्तातुरः भवति। यतोहि-कन्यायाः पिता यद्यपि इन्द्रसमकक्षः भवेत् तथापि समानश्रेणि निम्नश्रेणिजनेभ्यः अनादरमेव प्राप्नोति।

**कन्यापितृत्वं दुःखं हि सर्वेषां मानकाङ्क्षिणाम्।**

कन्या स्वचरित्रविषये मातरं पितरं पतिं च संशयग्रस्तं करोति यत् कन्यायाः योग्यवरेण सह विवाहो भविष्यति न वा। अथवा कन्यायाः सुखमयभविष्यनिर्माणं भविष्यति न वा। अथवा सा पतिव्रता पत्नी भविष्यति न वा।

**प्रीतिपात्रम्** - यत्र एकत्र कन्या चिन्तायाः विषयो भवति तत्र अपरत्र कन्या प्रीतिपात्रभूता अपि भवति। सन्तानं प्रति स्नेहः मानवमनोवृत्तेः सामान्यलक्षणं शोभते। पुत्र्यः अपि बहुस्नेहप्राप्तिं कुर्वन्ति। पुत्री स्वपितुः दयिता अथवा प्रीतिपात्रभूता आसीत्। **गुणवती कन्याप्राप्तिः दीर्घतपस्यया सम्भाव्यते।**

यथा कन्यारूपेण सीतां निर्जनक्षेत्रे प्राप्य जनकस्य सम्पूर्णः अपत्यस्नेहः उद्घाटितः अभवत् यत्समयात् स्वाङ्के उद्धृत्य सीतां पुत्रीरूपेण स्वीकृतवान् तत्समयादेव जनकस्य गृहे सुखसमृद्धेः अतिशयवृद्धिः जाता।

**अवाप्तो विपुलामृद्धिं मामवाप्य नराधिपः।**

**शुभसूचकम्/मांगलिकम्** - अविवाहितकन्याः मांगलिकाः मत्वा अलंक्रियन्ते तथा तासाम् उपस्थितिः शुभशकुनरूपेण स्वीक्रियते। सुन्दरीणां वा सुसज्जितकन्या-नाम् आगमनं दर्शनं तथा तासां स्वागतसत्कारः सफलतायाः सौभाग्यस्य च प्रतीकं मन्यते। उदाहरणार्थं यदा रामः वनात् गृहम् आगतवान् तदा कुमार्यः कन्याः तस्य स्वागतार्थं तेषाम् अग्रे अग्रे प्रचलितवत्यः।

**कन्या..... रामस्य पुरतो ययुः।**

**शिक्षा**- कन्या परिवारस्य चिन्तायाः विषयः आसीत्। अतः पितरौ तस्याः सुखमयभविष्यनिर्माणाय विवाहपूर्वम् एव स्वगृहेषु समुचितं शिक्षयतः। यतोहि विवाहानन्तरं सर्वेषु धार्मिककृत्येषु एकाकिनी वा पत्या सह सम्मिलिता भवति स्म। अतः विवाहपूर्वे एव वैदिकानां तथा स्मार्तक्रियाकला-पानां तथा प्रयुक्तमन्त्राणां शिक्षा प्रदीयते स्म। उदाहरणार्थं रामस्य यौवराज्याभिषेकसमये कौशल्यामाता मन्त्रान् उच्चारितवती।

**सीताऽपि सन्ध्योपासने तत्परा आसीत्।**

कर्मकाण्डस्य शिक्षामतिरिच्य कन्याः शास्त्राणां, स्मृतीनां पुराणानामपि च पर्याप्तज्ञानयुक्ताः आसन्। तज्ज्ञानं ताभिः ब्राह्मणात् अभ्यागतात् ऋष्यादिभ्यः च लभ्यते स्म। अनेन प्रकारेण रामायणकालीनकन्याः सर्वांगीणतया शिक्षिताः भवन्ति स्म।

**2. पत्नीत्वम्** - कन्यायै नैतिकी व्यावहारिकी शिक्षा प्रदीयते स्म। यस्मात् कन्या विवाहानन्तरं सदाचारयुक्तं संयमितजीवनं यापयितुं सक्षमा भवेत् तथा सुखदुःखानां सर्वासु परिस्थितिषु समभावा प्रसन्नचित्ता च भवेत्। एवं पत्नीविषयककर्तव्यानां सुचारुरूपेण बोधः भवति स्म। यथा रामस्य वनगमनसमये सीता अपि स्वपतिना सह सुखदुःखे समभाविनी भूत्वा वनगमनाय उद्यता आसीत् यतो हि तया स्वपितृभ्यां पत्नीधर्मस्य समुचिता शिक्षा अवाप्ता। राजकुमारीभ्यः राजधर्मस्य शिक्षा अपि प्रदीयते स्म। येन ताः स्वपतेः राजकीयकार्येषु अपि सहभागिन्यः भवेयुः। युवराजपत्नी सीता राजधर्म ज्ञानयुक्ता आसीत्।

देवासुरसंग्रामे कैकय्याः स्वपतिना सह गमनेनापि एतत् सिद्ध्यति यत् कन्याः सैन्यशिक्षानिपुणाः आसन्। भीषणसंग्रामे यदा महाराज्ञः शरीरम् अस्त्रशस्त्रप्रहारेण जर्जरितमभवत् तथा महाराजः चेतनालुप्तोऽभवत् तदा कैकयी एव महाराजं रणभूमितः दूरं नीत्वा तस्य प्राणान् रक्षितवती।

अनेन सिद्ध्यति यत् स्त्रियः रथसंचालने प्राथमिक-चिकित्सायां चापि च निपुणाः आसन्।

लंकायामपि स्त्रियः एव सशस्त्रसैनिकाः आसन्। सीतांपरितः राक्षसीसैनिकाः शस्त्रधारिण्यः महिलासैनिकाः च आसन्।

विवाहानन्तरं पितृगृहात् पतिगृहे आगामिनी कन्या वधू-पदं सुशोभते। ''उह्यते पितृगृहात् पतिगृहम् इति वधूः।''

नवविवाहिता पत्नी पतिगृहे अनवबोधा भवति। नवीनवातावरणे अनुकूलनाय तस्याः स्नेहपूर्णव्यवहारेणैव साहाय्यं भवति। विशेषरूपेण श्वसुरस्य आशीर्वादेन तथा श्वश्रूः स्वमार्गदर्शनेन स्वाऽनुभवविहीनां पुत्रवधूं सम्यक्तया शिक्षयति स्म।

वाल्मीकिः पत्न्याः एकान्तिकनिष्ठायाः तथा सेवाभावनायाः बारम्बारम् आग्रहं कृतवान्।

**गतिरेका पितुर्नार्याः** यथा तन्त्रीं विना वीणावादनं न सम्भवम्, चक्रं विना रथचालनम् असम्भवं तथैव पतिं विना स्त्रीसुखम् असम्भवम्।

**आभूषणैरपि पतिः एव पत्नीम् अलङ्करोति।**

उपर्युक्त कथनानुसारेण एतत्सम्भाव्यते यत् रामायण-कालीन नार्यः मात्र कर्तव्यानां बन्धने एव बन्धिताः आसन्। तासां स्वाऽधिकाराः न आसन्। नैतता सर्वथा अनुचिता भवेत् एषा धारणा। तत्कालीन स्त्रीणां, तासां सुनिश्चित अधिकाराः अपि आसन् यथा भरणपोषणस्य अधिकारः, स्वसम्पत्तेः अधिकारः, वैवाहिकचयनाधिकारः इत्यादयः।

पत्न्याः सर्वाधिकमहत्त्वपूर्णोऽधिकारः तथा पत्युः सर्वाधिकमहत्त्वपूर्णः कर्तव्यो भवति- परिवारस्य भरणपोषणस्य समुचिता व्यवस्था। भारतीयभावनानुसारेण **''भार्याया भरणाद् भर्ता पालनाच्च पतिः स्मृतः।''**

पतिप्रदत्तसाधनव्यवस्थानां यथोचितसंवर्धनात् भार्या इति।

पत्न्याः संरक्षणं, सुखसुविधानां साधनं, स्नेह-प्रीतिपूर्णः व्यवहारः, प्रसन्नतायै सर्वाधिका सचेष्टा गतिः, कामोपभोगात् पत्न्यै परितुष्टिः इत्यादि पत्युः नैतिककर्तव्याणि तथा पत्न्याः स्वाऽधिकाराः स्मर्यन्ते।

पुत्र्याः विवाहसमये पितृभ्यां तस्यै यत् धनं प्रदत्तम्, तस्योपरि स्त्रीणाम् एकाऽधिकारो वर्तते स्म। अस्याऽतिरिक्तं राजा यथासमये ताभ्य उपहारान् प्रदत्तवान्, तेषामुपरि स्त्रीणां एकाऽधिकारो वर्तते स्म। यथा रामराज्याभिषेकसमये रामः सीतायै उत्तममणिरत्नजडितमालाम् उपहारस्वरूपेण प्रदत्तवान् तथा एषा माला एव सीता हनुमते तस्य अविस्मरणीय सेवायै पुरस्कारस्वरूपेण अर्पितवती।

कोशल्यायै अपि स्वाश्रितप्रजानां भरण-पोषणाय सहस्रग्रामाः उपहाररूपेण प्रदत्ताः आसन्। तेषां पार्श्वे स्त्रीधनप्राचुर्यम् आसीत् अतः बह्मचारिछात्राणां बहवः समूहाः सहाय्यं कुर्वन्ति स्म।

**''मेखलीनां महासङ्घः कौशल्यां समुपस्थितः।''**

पत्युः पत्न्याः च क्रमशः एक एव कर्तव्यो वा अधिकारो वा एष एव विद्यते यत् धार्मिकक्रियाकलापेषु तौ सहयोगिनौ तथा पूरकौ स्याताम्। सहधर्मचारिणी रूपेण पत्न्याः एषा प्रतिष्ठा एव एतत्दर्शयति यत् नारी धर्माचरणे पुरुषस्य समकक्षा एव शोभते। एषा मान्यता आसीत् यत् पतिपत्नी द्वावेव संयुक्तरूपेण एव स्वकर्मफलानि प्राप्स्यतः।

**''भर्तुर्भाग्यं तु नार्येका प्राप्नोति पुरुषर्षभ।''**

**3. मातृत्वम्** - पत्याः जीवनस्य गौरवमयी परिणतिः तथा तस्याः पूर्णव्यक्तित्वविकासेन मातृत्वं फलति। वंशप्रवर्तनमेव तस्याः समस्तस्नेहस्य, सुन्दरतायाः सफलतायाश्च प्रतीको वर्तते। पुत्रप्रसवं कृत्वा पत्नी वास्तविकरूपे स्वपतिमपि पुनर्जन्म ददाति अतएव सा धात्री अथवा जननी कथ्यते। प्राचीनभारतीयो वैवाहिकसम्बन्धः सदैव मातृत्व-पितृत्वरूपेण महत्-आदर्शरूपेण गौरवान्वितं करोति। मनोवञ्छित-सन्तानप्राप्तिहेतौ आचार-विचाराणां शुद्धिः पतिद्वारा पत्न्याः सर्वमनोरथानां परिपूर्त्तिः सर्वप्रमुखाः आसन्।

लौकिककथनानि यथा-

**1. पितृन्समनुजायन्ते नरा मातरमङ्गनाः**

मनुष्याणां चरित्रं मातृणाम् अनुकरणोपरि निर्मितं भवति,

पितु: अनुकरणोपरि न।

**2. न पित्र्यमनुवर्तन्ते मातृकं द्विपदा इति।**

वाल्मीके: दृष्ट्यां गो-वत्सप्रेम मातृप्रेम्ण: सत्यादर्श:।

**सत्परामर्शदातृमातृत्वम्** - मातु: प्रदत्तदिशानिर्देशा-नुसारेण जीवने सत्पथे प्रगति: भवति। ये मातृविमुखा: भवन्ति ते प्राय: नष्टीभूता: भवन्ति। यथा कैकसी माता रावणं प्रति सम्बोधितवती यत् सीता पुन: रामाय दातव्या तथा रामेण सह सन्धिं कृत्वा सुखसाम्राज्यस्य वृद्धिं कुरु।

**स्नेहप्रणयसम्भोगै: समा हि मम मातर:।**

इदानीं नारीणां सम्बन्धविषये एक: प्रश्न: उत्पद्यते यत् पतिपुत्रयोर्मध्ये नार्या: स्नेहस्य अधिकाऽधिकारी क: वर्तते?

उत्तरस्वरूपं प्रगाढमातृस्नेहेन प्रेरिता भूत्वा कौशल्या माता अपि यदा दशरथस्य गृहं त्यक्त्वा रामेण सह वनं गन्तुम् उद्यता अभवत् तदा राम: स्वयं मातरं सम्बोधितवान् यत् यावत्पर्यन्तं मम पिता दशरथ: जीवित: स्वधर्मपरायणश्च वर्तते तावत्पर्यन्तं दीनविधवावत् मया सह भवत्या: आगमनं कदाऽपि न शोभते। भवती अपि स्वधर्मपरायणा एव शोभते। **तस्मिन् पुनर्जीवति धर्मराजे विशेषत: स्वे पथि वर्तमाने। देवी मया सार्धमितोऽभिगच्छेत् कथं स्विदन्या विधवेव नारी।**

इतोऽपि पतिं त्यक्त्वा पुत्रप्रेमान्धमाता कैकयी जगन्निन्द्या अभवत्।

**भर्तुरिच्छा हि नारीणां पुत्रकोट्या विशिष्यते।**

तथा जीवनान्तसमयेऽपि अथवा वैधव्य अवस्थायामपि मातर: पुत्रस्य स्नेहसम्बन्धप्रगाढताया: जीविताशा: भवन्ति स्म।

तासां मरणपश्चादपि मातृकल्याणाय यथासमयं तपस्विनं ब्राह्मणं प्रति दानं क्रियते स्म दानप्रथा च सुशोभते स्म।

**तासां रामो महादानं काले-काले प्रयच्छति।**
**मातृणामविशेषेण ब्राह्मणेषु तपस्विषु।।**

**निष्कर्ष:- गतिरेका पतिर्नार्या द्वितीया गतिरात्मज:।**
**तृतीया ज्ञातयो राजंश्चतुर्थी नैव विद्यते।।**

अनेन सिद्धान्तानुसारेण नार्य: स्वरक्षायाम् असमर्था: अबला: मन्यन्ते। मातर: पिता-पुत्र-बन्धुजनानाम् अधीना: स्वीक्रियन्ते। परन्तु व्यवहारे अस्य तात्पर्यम् ईदृशं न वर्तते। एतत् तु स्त्रीणां रक्षायै कथितम्।

वस्तुत: तु राम: एक: समाजसुधारक: महापुरुष: आसीत् तथा रामायणकालीनसमाजस्य नार्य: पारिवारिक-सामाजिक -धार्मिक सुखसमृद्धे: मूलभित्तिरूपेण आसन्। जीवनयात्रायां एकाकिपथिकरूपपुरुषेभ्य: नारीणां सेवास्नेहसहानुभूतिरूपेण गुणा: पथप्रदर्शनं कुर्वन्ति स्म।

**शोधच्छात्रा**
राष्ट्रिय-संस्कृत-संस्थानम्, जयपुरपरिसर:, जयपुरम्

**संस्कृतसमाचार:**

# पञ्चमं राष्ट्रीय पत्रकार सम्मेलनम्
# देवर्षि कलानाथ शास्त्रिण: सम्मानिता:

भारतीय संस्कृतपत्रकारसंघेन देहल्यां 10-11 दिसम्बर दिनाङ्क्या: पञ्चमं राष्ट्रियपत्रकार-सम्मेलनमायोजितं यत्र प्रमुखैर्विद्वत्प्रवरै: संस्कृतस्य संस्कृतपत्रकारतायाश्च विभिन्ना पक्षा विवेचिता:। अस्मिन्नवसरे ''शारदा'' पत्रिकाया: संस्था पक-सम्पादका विद्वद्वरवसन्त-गाडगिलवर्या: संस्कृत-पत्रकारताया: कृते सम्मानिता:।''भारती'' प्रधानसम्पादकाय देवर्षिकलानाथशास्त्रिणे आद्य: संस्कृतपत्रकारपुङ्गव-सम्मान: समर्पित:। पत्रकारसंघाध्यक्षेण पद्मश्री डॉ. रमाकान्तशुक्लेन, महासचिवेन डॉ. बलदेवानन्दसागरेण, कोषाध्यक्षेण डॉ. चन्द्रभूषण झावर्येण च संस्कृत पत्रकारसंघस्य प्रगतिविवरणं प्रस्तुवद्भि: सूचितं यत्सम्मेलने मूर्धान्या विद्वांस: पत्रकाराश्च समवायन्त, बिहारराज्यस्य, आरानगरस्थ जे.पी. समाजकल्याणन्यासप्रभृतिभि:, संस्कृतसंवर्धनाय समर्पितेनग्रणी प्रतिष्ठानेन राष्ट्रिय संस्थानेन (मानित-विश्वविद्यालयेन) चापि सम्मेलनस्यास्य प्रभूतं साहाय्यमनुष्ठितम्।

# भारतीमञ्जुनिकुञ्जम्

## ( पूर्वानुवृत्तम् )

❑ डॉ. रामनारायण झा

### वैदिकगणितम्

श्राविकं सांख्यशास्त्रं हि नस्साम्प्रतम्,
संसृतौ प्रेष्ठ ! वैज्ञानिकानां भिषक्,
नास्ति पथ्यं समं चास्य वा संसदि,
हा कथम् आहता भारते भारती।। 206।।

वर्तयामः परेषां कथं कुत्सिते,
क्वेति तारेण स्वस्मिन्समेहि पुनः।
हा गमो मेति सारं गदामः पथि,
हा कथम् आहता भारते भारती।। 207।।

### वात्स्यायनकृत-कामसूत्रम्

मीनकेतोरशेषं नरीनृत्यते,
शस्त्रमस्त्रं दरीदृश्यते हाटकम्,
मानचित्रं विचित्रं सरीसृज्यते,
हा कथं भारती आहता भारते।। 208।।

### कामसूत्राधिकमान्यताद्य

कामशास्त्रं विशालं हि वात्स्यायनैः,
शंसितं कामशालं कृतिस्संस्कृते।
रोचतेऽशेष शास्त्राधिकम्मे च ते,
हा कथं भारती आहता भारते।। 209।।

### कामसूत्रे सुरतासनलास्यम्

कामकेल्यासनानां समूहो मनो,
फुल्लयन् यौवनानामिदं क्रीडयन्।
वर्धयन्नत्र लास्यं रतीनामयम्,
आहता भारते भारती हा कथम्।। 210।।

### साहित्यशब्दविलासः

अष्टविद्यासु साहित्यशास्त्रन्दश,
साहचर्यस्य वागर्थयोर्मन्दिरम्।
तौ च विश्वं ह्युपास्ते बृहत्सुन्दरम्,
आहता भारते भारती हा कथम्।। 211।।

### कविलक्षणम्

भावना कल्पना कर्म चास्ति द्वयं,
काव्यवाच्यं कविः क्रान्तदर्शी रविः।
नीरसं यो विधत्ते रसैर्निर्भरम्
आहता भारते भारती हा कथम्।। 212।।

वर्णनीयो विधत्ते प्रभूतं लघु,
सच्च पुष्णात्यसद्योपि स्वर्णं मृदम्।
निर्जनं पत्तनं क्रान्तदर्शी कवि -
राहता भारते भारती हा कथम्।। 213।।

### साहित्यशास्त्रतत्त्वादर्शः

रीत्यलङ्कारदोषा गुणा वै रसाः,
नायिका शब्दशक्त्यर्थनृत्त्यादयः।
वृत्तिभावानुभावा विभावो नटी,
हा कथं भारते आहता भारती।। 214।।

काव्यभेदोपभेदार्थहेत्वादयो,
वर्णवाक्ये पदं स्थायिभावाश्च ते।
लक्ष्म चैषान्नवं सर्गबद्धन्नु किम्,
आहता भारते भारती हा कथम्।। 215।।

(क्रमशः)

व्याख्याता (संस्कृत)
राजकीय कल्याणमहाविद्यालय, सीकर

# 'किं वयं जानीमः' - स्वपरीक्षणं कुर्मः

❑ आचार्यमदनलाल शर्मा

1. ऋग्वेदस्य धर्मनिरपेक्षतायाः सूक्तमस्ति –
   (क) वरुणसूक्तम्  (ख) पुरुषसूक्तम्  (ग) विष्णुसूक्तम्  (घ) द्यूतसूक्तम्  ( )
2. छान्दोग्योपनिषदोऽनुसारं पञ्चमो वेदः कथ्यते –
   (क) धनुर्वेदः  (ख) इतिहासपुराणम्  (ग) आयुर्वेदः  (घ) महाभारतम्  ( )
3. पुराणानि कति ?
   (क) चत्वारि  (ख) अष्ट  (ग) चतुर्दश  (घ) अष्टादश  ( )
4. महात्मनो बुद्धस्य मातुर्नाम किमासीत् ?
   (क) सुवर्णाक्षी  (ख) यशोधरा  (ग) महामाया  (घ) विशालाक्षी  ( )
5. सर्गादौ सर्गान्ते च 'श्री' शब्दस्य प्रयोक्ता कविः कः ?
   (क) माघः  (ख) भासः  (ग) श्रीहर्षः  (घ) भारविः  ( )
6. संस्कृतसाहित्यस्य प्रथमं दूतकाव्यं किम् ?
   (क) नेमिदूतम्  (ख) पत्रदूतम्  (ग) मेघदूतम्  (घ) हंसदूतम्  ( )
7. 'रावणवधम्' इति महाकाव्यस्य रचयिता कः ?
   (क) भारविः  (ख) भट्टिः  (ग) भतृहरिः  (घ) भासः  ( )
8. भवभूतेः उत्कृष्टं नाटकं मन्यते –
   (क) मुद्राराक्षसम्  (ख) मालतीमाधवम्  (ग) उत्तररामचरितम्  (घ) महावीरचरितम्  ( )
9. 'किन्तोः कुटिलता' इत्यस्य निबन्धकारः कः ?
   (क) पं. गणेशरामशर्मा  (ख) ऋषिकेशभट्टाचार्यः  (ग) पं. नवलकिशोरकाङ्करः  (घ) भट्टमथुरानाथशास्त्री  ( )
10. व्याकरणे इत्संज्ञाविधायकं सूत्रमस्ति –
   (क) अदर्शनं लोपः  (ख) तस्य लोपः  (ग) हलन्त्यम्  (घ) हंसदूतम्  ( )

व्याख्याता, श्री अशोकशर्मा राजकीय उच्च माध्यमिकविद्यालयः, लालसोट

1 (घ) 2 (ख) 3 (घ) 4 (ग) 5 (घ) 6(ग) 7 (ख) 8 (ग) 9 (घ) 10 (ग)

# ।। मातुलगेहम् ।।

❑ परमानन्दशर्मा ''प्रमोदः''

छुक्छुक् छुक्छुक् गच्छति यानं, मार्गं तस्य च लौहमयम्।
चल चल बन्धो! मातुलगेहं, मातुलभवनं स्वर्गमयम्।।
तत्र पिबामो मधुरं दुग्धं, आम्रफलानि च खादामः।
नित्यं नवनीतमवलेह्य, परमां पुष्टिं विन्दामः।।
प्रतिबन्धः किं भवति न जाने, नास्ति च मातुः पितुर्भयम्।
चल चल बन्धो ! मातुलगेहं, मातुलभवनं स्वर्गमयम्।।

मातामही श्रावयति रात्रौ, भूपतिरासीत् पुण्यात्मा।
अथवा विपिनं संतपति स्म, महान् तपस्वी सिद्धात्मा।।
एवं मधुरां गाथां श्रुत्वा, भवामि नित्यं भावमयम्।
चल चल बन्धो ! मातुलगेहं, मातुलभवनं स्वर्गमयम्।।

रा.उ.मा.वि. आगूचा, जिला-भीलवाड़ा

# व्याकरणशास्त्रे सूत्र-लक्षणम्

❑ जितेन्द्रकुमारशर्मा

अन्येषु शास्त्रेषु यथा मौलिकग्रन्थाः सूत्रनिबद्धाःसन्ति, एवमेव व्याकरणशास्त्रेष्वपि मौलिकग्रन्थाः सूत्रेषु निबद्धाः। व्याकरणशास्त्रस्य प्रधानः ग्रन्थः पाणिनिरचितः 'अष्टाध्यायी' इति अस्ति। पतञ्जलेः 'महाभाष्यम्' अस्य ग्रन्थस्य एव व्याख्या अस्ति। कात्यायनस्य वार्तिका अपि अष्टाध्यायी-ग्रन्थस्य पूरका एव सन्ति। अतः सर्वेषां व्याकरणग्रन्था-नामाधारः पाणिनिप्रणीतः 'अष्टाध्यायी' ग्रन्थः एव अस्ति।

ग्रन्थेऽस्मिन् सूत्राणि एव सन्ति। अतः सूत्रपदार्थस्य विवेचनमावश्यकम्।

**अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्।**
**अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः।।**

इति सूत्रस्य लक्षणमस्ति। श्लोकेऽस्मिन् सूत्रस्य षड्गुणाः परिकीर्तिताः -

**१. अल्पाक्षरत्वम्** - अयं सूत्रस्य प्रधानः गुणः अस्ति, यतो हि लघ्वर्थमेव सूत्राणां सर्जनं भवति। पूर्वोक्तविषयाणां तु अनुवृत्तिमाध्यमेन सूत्रेऽध्याहारो भवति। यथा 'कर्मणि द्वितीया' २/३/२ इति सूत्रेण अनूक्ते अनभिहिते कर्मणि द्वितीया भवति। अत्रः 'अनूक्ते' इति पदस्य लाभः पूर्वसूत्रात् (अनभिहिते) २/३/१ इत्यतः भवति। सूत्रेषु क्रियापदस्य प्रयोगो न भवति। क्रियापदानि विनाऽपि सूत्राणि सम्पूर्णानि भवन्ति। वैयाकरणेभ्यः प्रसिद्धमस्ति यत् 'अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः' इति। अर्थात् वैयाकरणाः अल्पादल्पैः वर्णैः नियमान् रचयन्ति, ते नियमाःसूत्राणि कथ्यन्ते। भाष्यकारः पतञ्जलिः कथयति- 'वर्णेनाप्यनर्थकेन न भवितव्यं, किं पुनः इयता सूत्रेण' इति। अर्थात् पाणिनेः सूत्रेषु एकैकस्य वर्णस्यापि प्रयोगः अत्यन्तविचारपूर्वकं कृतः। सम्पूर्णव्याकरणनियमानां संकलनं प्रायशः चतुः सहस्रेषु सूत्रेषु कृतः महर्षिपाणिनिना। 'अल्पाक्षरत्वं' भारतीयशिक्षापद्धत्यामेको महान् गुणोऽस्ति। यतोहि अनेन गुणेन एव अस्माकं वैदिक-पौराणिक-वाङ्मयं सुरक्षितमभूत्। अत्र तु लेखनपरम्परायाः अभावे अस्माकं विशालवाङ्मयस्य परम्परायाः संक्रमणं न भवितुं शक्यते। वेदस्यापरं नाम 'श्रुति' अपि। यतोहि ऋषिभिः श्रवणेन एव वेद-ज्ञानं प्राप्तम्। श्रवणमाध्यमेन एव ज्ञानमिदं शिष्यैः प्राप्तम्, एवं वैदिकपौराणिकादीनां विषयाणां श्रवणमाध्यमेनैव संक्रमणमभूत्। अतः अल्पाक्षरत्वं भारतीय-शिक्षा-पद्धत्यां पदे-पदे स्पष्टमस्ति। पूर्वैः तु सूत्राणि एव मुख्यरूपेण रचितानि। यदा मानव-मनीषा क्षीणाभूत् तदा सूत्र-स्थाने श्लोकाः रचिताः। श्लोकेषु अल्पाक्षरत्वं सूत्रतुलनायां तु न्यूनं भवति, किन्तु अत्र पद्यानन्दः भवति। अस्मात् कारणात् श्लोकाः इतिहास-पुराणानां कथानां वाहकाः सन्ति। अल्पाक्षरत्वमिति गुणस्तु सूत्राणां कृते परमावश्यकमस्ति। एतद् विना सूत्रस्य सूत्रसंज्ञा एव न भवितुं शक्यते। अतः अल्पाक्षरत्वं सूत्रस्य प्रधानभूतः गुणः वर्तते।

**२. असंदिग्धत्वम्** - अयं गुणः तु सर्वासु लेखनविधासु आवश्यकः। परञ्च सूत्रे गुणोऽयं परमावश्यकः, यतो हि सूत्रे एकवारमेव नियमोल्लेखो भवति, तत्र यदि असंदिग्धता न स्यात् तर्हि सर्वेषु सूत्रेषु संदेहस्य व्याप्तिः भवितुं शक्यते। अतः सूत्रकारैः सूत्रनिर्माणे असंदिग्धत्वमिति गुणः विशेषतया-विचारणीयः।

पाणिनीयसूत्रेषु असन्दिग्धत्वं सर्वेषु सूत्रेषु प्रकटितम्। असंदिग्धत्वात् महर्षिपाणिनिना विशेष-संज्ञा-परिभाषाणां रचना कृता। यथा 'इको यणचि' इति सूत्रस्यार्थः - 'इकः स्थाने यण् स्यादचि परे' इति भवति। अत्र इक् पदेन इ-उ-ऋ-लृ इति वर्णाः एव बोद्धव्या यतोहि इकादि प्रत्याहाराणां निर्माणाय महर्षि पाणिनिना माहेश्वरसूत्राणि प्रोक्तानि। 'इकः'

इत्यस्य अर्थ इक् स्थाने इति अस्ति। अयमर्थः 'षष्ठी स्थाने-योगा' इति परिभाषया एव भवति। 'अचि' इत्यस्यार्थः अच् इत्यस्य अव्यवहित पूर्वे इति अस्ति। यतोहि 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषासूत्रेण-सप्तमीनिर्देशेन विधीयमानं कार्य वर्णान्तरेणाऽव्यवहितस्य पूर्वस्य बोध्यम्। अच् इति पदेन सर्वे स्वरवर्णाः बोध्याः माहेश्वरसूत्रनिर्देशात्। अतः 'इको यणचि' इति सूत्रस्य असन्दिग्धं ज्ञानं भवति यत् इकः स्थाने यण् स्याद् अव्यवहिते अचि पूर्वे। तेन सुधी उपास्यः इति प्रयोगे कृते सुतरां सूत्रस्य प्रवृत्तित्वात् ईकारस्य स्थाने यकारादेशो भवति तेन सुध्युपास्यः इति सिद्ध्यति। अतः सूत्रे सर्वेषां पदानां निश्चितार्थो भवेत्, येन सूत्रार्थे असन्दिग्धत्वं स्यात्।

**३. सारवत्ता** -सूत्रस्य लक्षणे 'सारवत्' इति तृतीयं लक्षणं कथितम्। सूत्रे 'सारवत्ता' इत्यस्याभिप्रायः अस्ति यत् सूत्रे भाष्यादिवत् वाद-विवादो न भवेत्। सिद्धान्तानां समायोजनं एवं भवेत् यत् सर्वेषां नियमानां प्रतिपादनं दृढरूपे भवेत्। सूत्रस्यार्थः सुगमतया भवेत् तत्र टीका-प्रटीकायाः आवश्यकता न्यूनातिन्यूनरूपेण एव भवेत्। एवं सूत्रे सारवत्ता भवति। पाणिनीय सूत्रेषु सरवत्ता स्पष्टमस्ति। सरवत्तायाः अभिप्रायः अयमपि अस्ति यत् विद्वद्भिः एव सूत्राणामर्थः विज्ञेयः। सूत्राणां नियमानां निष्कर्षाः भवन्ति अतः तेषु सारवत्ता आवश्यकमस्ति।

**४. विश्वतोमुखत्वम्** - इदं सूत्रस्य चतुर्थं लक्षणमस्ति। यदा सूत्राणि पूर्वपरादि संदर्भादियुक्ताः भवन्ति तदा तेषु विश्वतोमुखत्वमिति गुणो भवति। यतोहि पूर्वसूत्रादिभिः संदर्भितसूत्रे केषां पदानाम् अनुवृत्ति आगच्छति तथा च संदर्भितसूत्रात् केषु सूत्रेषु कस्य पदस्यानुवृत्तिः गच्छति, इति बोधः यावत् न भवति तावत् विश्वतोमुखत्वमिति गुणः सूत्रे न भवति। अतः सूत्राणां सम्यक् बोधाय सूत्रेषु विश्वतोमुखत्वमिति गुण आवश्यकः भवति। अत एव सूत्रलक्षणे अस्य समाहारः क्रियते।

**५. अस्तोभत्वम्** - इदं सूत्रस्य पञ्चमं लक्षणमस्ति। स्तोभः अवरोधः भवति, अस्तोभः अनवरोधः इति उच्यते। सूत्रे अवरोधो न स्यात् अर्थात् प्रवृत्तिक्षेत्रे कस्यापि बाधा न भवेत्। यत्र-यत्र सूत्रस्य प्रवृत्तिः भवेत् तत्र-तत्र अबाधित प्रवृत्तिः भवेत् इति गुणः 'अस्तोभम्' इति पदेन सूत्रलक्षणे उक्तः। पाणिनीयव्याकरणस्य सूत्रेषु सर्वेषां सूत्राणां प्रवृत्तिक्षेत्रं निश्चितम् अस्ति। अतः सर्वाणि सूत्राणि सार्थकानि, न कमिपि निरर्थकम्। अत एव महर्षिपतञ्जलिना उक्तं महाभाष्ये - 'वर्णेनाप्यनर्थकेन न भवितव्यम्, किं पुनः इयता सूत्रेण' इति। अर्थात् पाणिनीय सूत्रेषु वर्णाः अपि निरर्थकानि न सन्ति, अतः सूत्राणि तु कथमपि निरर्थकाः न भवितुं शक्यन्ते। पाणिनीय व्याकरणे सर्वाणि सूत्राणि स्तोभरहितानि सन्ति।

**६. अनवद्यम्** - अनवद्यमिति सूत्रस्य षष्ठं लक्षणमस्ति। सूत्रम् अनवद्यं भवेत् अर्थात् दोषरहितं भवेत्। दोषाः त्रिविधाः सन्ति-अव्याप्तिदोषः, अतिव्याप्तिदोषः, असम्भवदोषः च। 'लक्ष्यैकदेशावृत्तित्वम्' इति अव्याप्ति नामको दोषः। अर्थात् यदा सूत्रस्य प्रवृत्तिःकुत्रचिदेव भवति, सर्वत्र न भवति, तदा सूत्रम् अव्याप्ति-दोषयुक्तं भवति। सूत्रे दोषोऽयं न भवेत्।

'लक्ष्यवृत्तित्वे सति लक्ष्येतरवृतित्वम्' इति अतिव्याप्ति-दोषस्य लक्षणमस्ति। अर्थात् यदा सूत्रस्य प्रवृत्तिः लक्ष्यस्थानेऽपि भवति अलक्ष्यस्थलेऽपि भवति तदा सूत्रम् अतिव्याप्तिदोषयुक्तं भवति। सूत्रे अयमपि दोषः न भवेत्। सूत्रे असम्भवदोषः अपि न स्यात्। 'लक्ष्यमात्रावृत्तित्वम्' इति असम्भवदोषस्य लक्षणमस्ति। अस्य अभिप्रायो वर्तते यत् सूत्रस्य रचना यस्य प्रयोजनस्य कृतेऽस्ति, तत् सूत्रं तत्प्रयोजनं पूर्णयितुसमर्थो न भवेत् अर्थात् सूत्रस्य प्रवृत्तिः स्वलक्ष्ये न भवेत्। यदा सूत्रनिर्दिष्टं कार्यम् अन्यैः सूत्रैः बाधितं भवति तथा च सूत्रस्य प्रयोजनं न सिद्ध्यति तदा एषः दोषः जायते। सूत्रे अयमपि दोषः न भवेत्।

शोधच्छात्रः

ज.रा.रा.सं.वि.वि.जयपुर

# संस्कृतसाहित्ये माघस्य स्थानम्

❑ योगेश कुमारः

कालिदासानन्तरं भारवेर्नाम महाकवीनां गणनायाम् आयाति। संस्कृतकाव्यानां बृहत्त्रय्याम् अस्य नाम ऐतिहासिकक्रमेण प्रथमत आयाति। संप्राप्तमहाकाव्येषु पञ्चमहाकाव्यानां नामानि विद्वद्भिः समादरेण गृह्यन्ते। इमानि महाकाव्यानि रघुवंशम्, कुमारसंभवम्, किरातार्जुनीयम्, शिशुपालवधं, नैषधीयचरितञ्च सन्ति। एषु महाकाव्यद्वयं तु कालिदासस्य, एकं भारवेः एकं माघस्य एकञ्च वर्तते महाकवेर्हर्षस्य। कालिदासस्य शेषत्रयस्य च रचनाशैल्योर्भेदोऽस्ति। भावपक्षस्य स्थाने कलापक्षस्य पक्षपातिनो परवर्तिनो विद्वान्सः सन्ति महाकाव्येषु तेषु किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितञ्चेति सम्भूय बृहत्त्रयीति संज्ञा।

अस्मिन् श्रेणिद्वये विद्वद्भिर्माघस्य स्थानं द्वितीयश्रेण्यां संरक्षितम्। सरलताया आधारे रसप्रधानताया आधारे च द्वितीया श्रेणी भवति। अत्र जटिलतायाः सम्बन्धो विद्वत्तायाः बहुज्ञतायाश्च प्रौढप्रकाशनेन वर्तते। स्पष्टं तु वर्तते अत्र यत् माघस्य महाकाव्ये द्वितीयश्रेण्याः रचनायाः सद्भावोऽस्ति।

ननु विचारणीयं खलु इदं वर्तते यत् भारवि-माघ-श्रीहर्षेषु महाकविमाघस्य स्थानं कीदृशं वर्तते? माघात् पूर्वं कविर्भारविः परवर्तिकविश्च श्रीहर्षोऽस्ति। इदं तु स्पष्टं प्रतिभाति यत् भारवेरर्थगौरवं माघात् वरं ननु, यावद्धि हर्षस्य शैल्यां माघस्य पर्याप्तरूपेण प्रभावो वर्तते। यथा भारवेरग्रे गन्तुं माघाय अवसरः आसीत् श्रीहर्षाय अपि माघात् अग्रे गन्तुं तथैव अवसर आसीत्।

अवसरस्यास्य उपयोगः विशालकाव्यस्य रचनायां तु जातः, किन्तु इयं रचना हर्षस्य मौलिकप्रतिभां प्रकाशमितुं समर्था नाभूत् सरलतया निष्कर्षोऽयम् आयाति यत् महाकविर्माघो बृहत्त्रय्यां सर्वश्रेष्ठोऽस्ति।

निर्णयेऽस्मिन् माघविषये प्रचलिताः समालोचकानां सम्मतयोऽपूर्वरूपेण सहायिकाः सन्ति, प्राथमिकरूपेण यथा समालोचकानां मते कविषु कालिदासस्य स्थानं सर्वोत्तमं वर्तते, तथैव साहित्यशास्त्रसम्मतलक्षणैः पूर्णं माघस्यैव महाकाव्यमस्ति। यथोक्तम् -

**पुष्पेषु जाती ( चम्पा ) नगरीषु कांची,**
**नारीषु रम्भा पुरुषेषु विष्णुः,**
**नदीषु गंगा नृपतौ च रामः,**
**काव्येषु माघः कविकालिदासः।।**

वस्तुतस्तु लक्षणानाम् इयती सम्पूर्णता अपरकाव्येषु न प्राप्यते।

माघः युगस्य सर्वातिशायी कविर्न भवेत्, किन्तु युगप्रतिनिधि-कविस्तु अवश्यमेव वर्तते। तस्य महाकाव्यं तु निश्चितरूपेण तद्युगस्य सर्वश्रेष्ठरचना वरीवर्ति। एतादृशीयं रचना वर्तते, यस्यां रसपक्षस्य कलापक्षस्य, पाण्डित्यपक्षस्य च अद्भुता अन्वितिः नूनम् अपरकवीनां मदहन्त्री कवेरात्ममदवर्धयित्री न भवति। यथोक्तम्- 'माघः शिशुपालं विदधन् कविमदवधं विदधे।'

अपरञ्चेदं यत् परवर्तिनां कवीनां रचनाशैलीषु यावान् व्यापकप्रभावो महाकवेर्माधस्य जातस्तादृशो नास्ति कस्यापि तु अपरकवेः। अस्यायं व्यापकप्रभावो न केवलं संस्कृतकविषु एवास्ति, अपि तु अपभ्रंशकविषु, उत्तरभरतीयाधुनिकार्यभाषाणाम् आरम्भिक-महाकविषु अपि तथैव वर्तते।

कोऽपि चेत् उपरितनानां मानदण्डानामाधारे सन्तुलितदृष्ट्या निर्णयमिमं दद्यात् यत् महाकविर्माघः कविषु महाकविकालिदासानन्तरं प्रथमस्थानीयोऽस्ति तर्हि नास्ति तत्र किमपि अनौचित्यम्। वस्तुतस्तु समालोचकैः तस्य काव्यस्य कृते प्रथमं स्थानं प्रदत्तम्। अस्य कृते सबलप्रमाणानि प्रबलयुक्तयोऽपि च सन्ति, किन्तु कालिदासस्य काव्यानाम् आभा कापि अपरा एव वरीवर्ति। यावत्तु यत्र कुत्रचित् माघस्योक्तयः कालिदासाद् विशिष्टा सन्ति परन्तु सर्वाङ्गीणदृष्ट्या वयं चेत् विलोकयामस्तर्हि माघः कालिदासाद् अतिशायी इति कथनं नास्ति समीचीनम्।

शोभनमिदं भविष्यति यत् विषयेऽस्मिन् वयं ताः सम्मतीरपि विलोकयामो या माघस्य उत्कृष्टत्वं बोधयन्ति यथा–

1. नवसर्गगते माघे नव शब्दो न विद्यते। 2. माघे सन्ति त्रयो गुणाः। 3. मेघे माघे गतं वयः। 4. माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमे। 5. मुरारि-पदचिन्ता चेत्तदा माघे रतिं कुरु। 6. तावद् भा भारवेर्भाति यावन्माघस्य नोदयः। 7. माघेनैव च माघेन कम्पः कस्य न जायते।

प्रस्तुतविवेचनेन इदं स्पष्टं जायते यत् महाकवि-कालिदासानन्तरं संस्कृतस्य महाकविषु महाकवेर्माघस्य स्थानं सर्वप्रथमं सर्वोत्तमञ्च वरीवर्ति।

शोधच्छात्रः
ज.रा.रा.संस्कृतविश्वविद्यालयः

# ज्ञानगङ्गा

❑ बद्रीप्रसादशर्मा

प्र.1. विश्वप्रसिद्धं ब्रह्मा मन्दिरं कुत्र वर्तते ?
उत्तर पुष्करे (अजमेर मण्डले)

प्र.2. आमेर दुर्गे (जयपुरे) कस्याः मन्दिरं वर्तते ?
उत्तर शिला देव्याः

प्र.3. 'रिसर्जेन्ट राजस्थान' इति महोत्सवः कुत्रायोज्यते?
उत्तर जयपुरे

प्र.4. 'राष्ट्रीय-मरु-उद्यानम्' जैसलमेर इत्यस्यापरं किं नाम ?
उत्तर जीवाश्म उद्यानम्।

प्र.5. राज्ञो भर्तृहरेः प्रसिद्धा गुहा कुत्र वर्तते ?
उत्तर अलवर मण्डले

प्र.6. राजस्थान-साहित्य-अकादम्याः सर्वोच्च-पुरस्कारः कः अस्ति ?
उत्तर मीरा पुरस्कारः

प्र.7. राजस्थानी शब्द कोशस्य रचयिता कः वर्तते ?
उत्तर सीताराम लालसः

प्र.8. 'धरती धोराँ री' रचना कस्य कवेः वर्तते ?
उत्तर कन्हैयालाल सेठिया महोदयस्य

प्र.9. राजस्थाने राज. साहित्य अकादम्याः स्थापना कदा अभवत् ?
उत्तर 1958 तमे वर्षे

प्र.10. बाबा-रामदेव-मेलापकः राजस्थाने कुत्र आयोज्यते?
उत्तर रूणिचा (पोकरणजनपदे)।

प्र.11 राष्ट्रीय विधि विश्वविद्यालयः कस्मिन् नगरे वर्तते
उत्तर जोधपुरे

(वरिष्ठ अध्यापकः, संस्कृतम्)
रा. कान्या उ. मा. वि. ब्यावर (अजयमेरु)
मो. – 8104535392

संस्कृतसमाचाराः

# संस्कृतविश्वविद्यालयदीक्षान्तसमारोहः

❑ देवर्षिकलानाथशास्त्री

जयपुरस्य जगद्गुरु-रामानन्दाचार्य-राजस्थान-संस्कृत विश्वविद्यालयस्य प्रथमो दीक्षान्तसमारोहो मार्गशीर्षशुक्ल-पञ्चम्यां 16 दिसम्बरदिनाङ्के ससम्भारं समायोज्यत यत्र कुलाधिपतिना राजस्थानराज्यपालेन कल्याणसिंहेन 80 सहस्र (अशीतिसहस्र) परीक्षोत्तीर्णस्नातकेभ्य उपाधयो वितीर्णाः 105 शोधोपाधयो वितीर्णाः, सर्वाधिकाङ्क्षान् लब्धवद्भ्यः 156 स्वर्णपदकानि वितीर्णानि। सन् 2001 वर्षात्प्रारब्ध-स्यास्य विश्वविद्यालयस्यायं प्रथमो दीक्षान्तसमारोहोऽ-भूदतोऽस्मिन् तस्मादेव कालादारभ्य सर्वेष्वेषु वर्षेषु विश्वविद्यालयपरिसरे समायोजितेऽस्मिन् वितरणोत्सवे पीठाध्यक्षाणां, कुलपतिचराणां, विद्वत्प्रवराणां, स्थानीय-विधानसभासदस्यानां, जननेतॄणां, परिषत्सदस्यानां चोपस्थितौ कुलपतिना डॉ. विनोदशास्त्रिणा स्वभाषणे (संस्कृते) विश्वविद्यालयस्येतिहासः सूचितः, वर्तमाना प्रगतिः प्रस्तुता, भावियोजनाश्च स्पष्टीकृताः। कुलाधिपतिना संस्कृतस्य कम्प्यूटरप्रविधिगतं महत्त्वं सूचयता स्तरोन्नयनस्यानुशंसा कृता। विश्वविद्यालयेनानेन शोधपत्रिका-रूपेण ''वयम्'' इत्याख्यं यन्मुखपत्रं प्रकाश्यते, ''प्रवृत्तिः'' इत्याख्यं च यद् वृत्तपत्रं प्रकाश्यते, तयोरेकं ''प्रवृत्ति'' पत्रमस्मिन्नवसरे लोकायार्पितम्।

समारोहस्यास्वाङ्गत्वेनानेकेऽन्ये कार्यक्रमा अप्या-योज्यन्त येष्वेकतमोऽभूद् विश्वविद्यालयनिकटस्थे पीपलाग्रामे विकासकार्याणां निरीक्षणं, जयपुरस्थे महारानीकालेजाख्ये महाविद्यालये सांस्कृतिककार्यक्रमस्यायोजनम् अन्य उत्सवोऽभूत्। स्मरामो वयं यद् विश्वविद्यालयेषु दीक्षान्त-समारोहाः (उपाधिवितरणोत्सवाः) पूर्वं प्रतिवर्षमायोज्यन्ते स्म, सर्वेभ्यश्च विधिवदुपाधयः प्रदीयन्ते स्म किन्तु कालगतिवशाज्जनसंख्याया असीमितवृद्धिवशाच्च स्नातकसंख्यावैपुल्येन प्रतिवर्षमायोजनं दुष्करीकृतम्। अतः कालातिपातेन पञ्चषवर्षाणामुपाधयः कस्मिंश्चन दीक्षान्त-समारोहे वितीर्यन्ते विश्वविद्यालयैः। राज्यस्य राज्यपाल एव प्रायशस्तस्मिन् राज्ये स्थितानां विश्वविद्यालयानां कुलाधिपतिर्भवति। वर्तमानस्य राजस्थानराज्यपालस्य कल्याणसिंहवर्यस्यायं सङ्कल्पो यत्सर्वे विश्वविद्यालयाः प्रतिवर्षं दीक्षान्तसमारोहमायोज्योपाधीन् वितरेयुः। तस्य प्रयासाद् बहुभिर्विश्वविद्यालयैर्विगतवर्षाणामुपाधीन् प्रदातुमुत्सवा आयोजिता, आयत्यां च प्रतिवर्षमिदं कार्यं स्यादित्यनेन सर्वत्रोदद्योष्यते।

**प्रधानसम्पादकः**

---

प्रेरकप्रसङ्गशतकम्

# चतुस्त्रिंशः प्रसङ्गः-सफलतायाः कुञ्जिका

❑ श्रीमती आराधना धर्माधिकारी

द्वौ ग्रामवासिनौ पितापुत्रौ ग्रामतः नगरं प्रति प्रस्थितौ। तीव्रातपस्य समय आसीत्। किञ्चिद्दूरं गत्वैव पुत्रः स्वेदक्लिन्नः श्रान्तश्चाभवत्। तेन कथितं तात। कुत्राप्युपविश्य विश्रामं करवाव। पिता अवदत्-कस्यापि महतो वृक्षस्याधः उपविश्य विश्रामं करिष्यावः। तत एकस्य वटवृक्षस्याधस्तावुपविष्टौ। सम्मुखे एव एकस्मिरन महतिक्षेत्रे कृषीवल एकः क्षेत्रं कर्षन्नासीत्। तस्य शरीरादपि स्वेदः प्रवहतिस्म। पिता पुत्रमवदत् पश्य एष कृषीवलः स्वेदक्लिन्नः अस्य शरीरान्निर्झरवत्स्वेदः प्रवहति अथापि सततं कार्यं करोति विश्रामस्य नामापि न गृह्णाति। विश्रामं कुर्याच्चेत् रात्रिपर्यन्तमपि कार्यं पूर्णं न स्यात्। श्रुत्वैवेदं पुत्रः उत्थायाब्रवीत्-सज्जोऽस्मि चलतु, अन्यथा आवामपि न रात्रिपर्यन्तं नगरे प्राप्स्यावः। मया ज्ञातं लक्ष्यप्राप्तिं यावदविराम एव सफलतायाः कुञ्जिका।

218, धर्माधिकारीभवनम्, ब्रह्मपुरी-जयपुरम्

नारी-स्तम्भः

# राष्ट्रपूजिका-सत्यवती

❑ डॉ. राजेश्वरी भट्टः



आजीवनं राष्ट्रहिताय समर्पिता शक्तेः प्रतिमूर्तिः सत्यवती राष्ट्रभक्तेषु सर्वदा स्मरणीया विद्यते। ई. 1907 तमे दिल्लीनगरे जाता सत्यवती आर्यसमाजे बहुश्रुतस्य राष्ट्रहिते त्यक्तदेहस्य 'स्वामिश्रद्धानन्दस्य' महोदयस्य पुत्र्यासीत्। स्वामिश्रद्धानन्दो मनसा वाचा कर्मणा निष्ठावान् राष्ट्रभक्त आसीत्। तस्य शिरासु राष्ट्रभक्तिरक्तं सततं प्रवहति स्म। स्वामि-श्रद्धानन्दस्य गृहं राष्ट्रविमर्शकानां कृते प्रेरणास्थलमासीत्। तस्य गृहद्वाराणि राष्ट्रप्रेमिणां कृते सर्वदोद्घाटितान्यासन्। अहर्निशं राष्ट्रस्वाधीनतायै कृतसंकल्पानां त्यागमूर्तीनां स्वसुखनिरभिलाषिणां राष्ट्रहितचिन्तकानां महत्संकल्पेन प्रेरिता सत्यवती राष्ट्रभक्तिमार्गं स्वीकृतवती। 1923 तमे सत्यवत्याः पिता स्वामी श्रद्धानन्दः साम्प्रदायिकसंघर्षे प्राणानुत्ससर्ज। पितुर्निधनानन्तरं तस्य अपूर्णं स्वप्नं पूरयितुं पुत्री सत्यवती आत्मानं स्वाधीनतासंघर्षे योजितवती।

1930 तमे सत्यवती प्रथमवारं सार्वजनिकसभायां मञ्चेन सत्याग्रहान्दोलनस्य सातत्यं प्राणेभ्योऽधिकं प्रतिपादितवती। अत्र सा प्रेरणास्पदैर्वचनैः आन्दोलनस्य सफलतायै विराट्जनसंकुलं प्रेरयामास। आत्मनो लक्ष्याय गतिं दिशाञ्च प्रदातुं सत्यवत्या अनेकाः सभा आयोजिताः, संघर्षयात्राणां नेतृत्वं कृतं, विदेशीवस्त्राणां दाहनञ्च कृतम्। किमधिकं महिलासंघटनानां समर्थनं प्राप्य सत्यवती विदेशनिर्मितानि वस्त्राणि धारयित्वा स्नानार्थं यमुनातटे गच्छन्तीनां महिलानां मार्गं रुरोध। 12 मई 1930 तमे स्वीधनतासंघर्षे त्यक्तजीवनस्य 'अमीलाल' नाम्नः कस्यचिदान्दोलनकारिणः शवं दृष्ट्वा क्रोधेन ज्वलन्ती सत्यवती अत्याचाराणां विरोधे कटुवचनान्यवदत्। परिणामतः सर्वकारेण सत्यवती षण्मासाय कारागृहे प्रेषिता। न्यायालये श्रावितं दण्डं, दण्डावधिञ्च श्रुत्वाऽपि विगतभया सत्यवती तत्रोपस्थिते विराड्जनसंकुलमध्ये विदेशीशासनान्मुक्तिमधिगन्तुं उच्चैरुद्घोषं कृतवती। सत्यवत्या मतेन यावद् राष्ट्रे एकोऽपि बालको बालिका वा प्राणान्धारयति तावत् सा विश्रामं न लप्स्यते। 1932 तमे वर्षे शासनविरोधि-क्रियाकलापैः सत्यवती पुनः कारागृहे प्रेषिता। इदानीं कारागृहे जाताभिरसुविधाभिः सत्यवती क्षयरोगेण ग्रस्ताऽभवत्। एवंगतेऽपि सा राजनैतिकगतिविधि-भिरभिन्नाऽऽसीत्। 1937 तमे वर्षे सर्वकारविरोधिकार्यैः सत्यवती पुनः बन्दिनी जाता, सहैव रक्षाकर्मिभिः प्रहारैः प्रताड़िता। द्विवर्षानन्तरं कारागृहान्मुक्ता सत्यवती पुनः स्वसंकल्पं साधयितुं प्रवृत्ता जाता। 1938 तमे वर्षे पञ्जाब-प्रान्ते समायोजिते सम्मेलने सत्यवती शासन-तन्त्रस्य विरोधे हृदयशूलकराणि कानिचिद् वचनान्यब्रवीत्। सर्वकारः तत्कालप्रभावेण सत्यवत्याः कृते पञ्जाबप्रान्ताद् निष्कासनस्य आदेशं प्रसारितवान्। मानधना सत्यवती सर्वकारस्यादेशं न स्वीचकार। सर्वकारस्यावमाननां कुर्वती सत्यवती पुनः कारागृहे प्रेषिता। सम्प्रति अस्वस्थताया गम्भीरावस्थां दृष्ट्वा शासनेन सा बन्धनमुक्ता कृता। मृत्योर्द्विदिवसपूर्वं सत्यवत्याः स्वास्थ्यसमाचारान् ज्ञातुं जवाहरलालनेहरू-महोदयश्चिकित्सालयमागच्छत्। ततः सत्यवत्या कथितम्

**यत् स्वतन्त्रभारतदर्शनमेव तस्या अन्तिमेच्छा वर्तते। जीवनस्यावसानसमयेऽपि राष्ट्रस्योदयं काँक्षन्त्यो नार्यः अस्माभिः सर्वदा स्मरणीया वर्तन्ते।**

**हिन्दी अनुवाद**

आजीवन राष्ट्र के हित के लिए समर्पित, शक्ति की प्रतिमूर्ति सत्यवती राष्ट्रभक्तों में सर्वदा स्मरणीय है। सन् 1907 में दिल्ली नगर में उत्पन्न सत्यवती आर्यसमाज के प्रतिष्ठित राष्ट्र की रक्षा के लिए प्राणों का बलिदान देने वाले स्वामी श्रद्धानन्द की पुत्री थी। स्वामी श्रद्धानन्द मन वचन कर्म से नैष्ठिक राष्ट्र भक्त थे। उनकी शिराओं में राष्ट्रभक्ति का रक्त वेग से बह रहा था। स्वामी श्रद्धानन्द की निवास स्थली राष्ट्रहित चिन्तकों के लिए प्रेरणास्थली के समान थी। श्रद्धानन्द जी के घर के द्वार राष्ट्र भक्तों के लिए सर्वदा खुले हुए थे। रात दिन राष्ट्र की स्वाधीनता के लिए कृतसंकल्प त्यागमूर्ति तथा अपने सुखों से विमुख राष्ट्रप्रेमियों के उदात्तचिन्तन से प्रेरित सत्यवती ने भी राष्ट्रभक्ति के मार्ग पर प्रयाण किया। 1923 ई. में सत्यवती के पिता स्वामी श्रद्धानन्द ने साम्प्रदायिक संघर्ष में अपने प्राणों का बलिदान किया। पिता के निधन के पश्चात् पिता के अधूरे स्वप्न को साकार करने के लिए सत्यवती स्वाधीनता संघर्ष में पूर्णतः संलग्न हो गई।

1930 ई. में सत्यवती ने पहली बार सार्वजनिक सभा में सत्याग्रह आन्दोलन की सफलता को प्राणों से भी अधिक महत्वपूर्ण बताया। इस सभा में सत्यवती ने अपने प्रेरणापूर्ण भाषण से विराट् जनसमूह को प्रेरित किया। सत्याग्रह आन्दोलन को गति प्रदान करने के लिए सत्यवती ने अनेक सभाओं का आयोजन, जुलूसों का नेतृत्व तथा विदेशी वस्त्रों की होली जलाई। यहाँ तक कि विदेशी वस्त्र धारण करने वाली, यमुना के किनारे स्नान करने के लिए आने वाली, महिलाओं के मार्ग को भी महिला संगठनों के साथ जाकर रोक दिया। 12 मई 1930 ई. में स्वाधीनता संघर्ष में मारे गए अमीलाल नामक आन्दोलनकर्त्ता के शव को देखकर क्रोध से जलती हुई सत्यवती ने अत्याचारियों के विरोध में कटुशब्द बोले। परिणाम स्वरूप सत्यवती को सरकार ने 4 महिने के लिए जेल की सजा दी। न्यायालय में सुनाये गये दण्ड एवं दण्ड की अवधि के विषय में सुनकर भी निडर सत्यवती ने न्यायालय परिसर में ही जनसमूह के मध्य विदेशी शासन से मुक्ति पाने के लिए शंखनाद किया। सत्यवती के अनुसार तब तक राष्ट्र में एक बालक अथवा एक बालिका भी जीवित है जब तक सत्यवती अपने लक्ष्य से रुकेगी नहीं। 1932 ई में सरकार विरोधी गतिविधियों के कारण सत्यवती को पुनः कारागृह में भेज दिया। इस बार कारागृह में प्राप्त कष्टों के कारण सत्यवती क्षय रोग से ग्रस्त हो गई। फिर भी उसने सरकार विरोधी कार्यों से मुहँ नहीं मोड़ा। 1937 ई. में सत्यवती शासन विरोधी क्रिया कलापों के कारण पुनः जेल भेज दी गई। साथ ही पुलिस के द्वारा उस पर प्रहार भी किया गया। दो वर्ष के पश्चात् कारागृह से लौटकर सत्यवती पुनः अपने संकल्प को पूर्ण करने में जुट गई।1938 ई. में पंजाब प्रान्त में आयोजित सम्मेलन में सत्यवती ने सरकार के विरोध में कटुवचनों का प्रयोग किया। क्रुद्ध सरकार ने तत्काल प्रभाव से सत्यवती का पञ्जाब प्रान्त से निष्कासन और फिर कभी पंजाब में प्रवेश न करने का आदेश दिया। मानधना सत्यवती ने सरकार के आदेश को मानना स्वीकार नहीं किया। अपने आदेश की अवमानना करने के कारण सरकार ने सत्यवती को पुनः कारागार में भेज दिया। इस बार सत्यवती कारागार में बहुत बीमार हो गई। सत्यवती की गम्भीर अवस्था को देखकर सरकार ने उसे बन्धन मुक्त कर दिया। दिनों दिन बहुत बीमार सत्यवती क्रमशः क्षीण हो रही थी। मृत्यु के दो दिन पूर्व पं. जवाहरलाल नेहरू सत्यवती के स्वास्थ्य समाचार जानने के लिए चिकित्सालय में आए थे। सत्यवती ने उनसे कहा कि स्वतन्त्र भारत का दर्शन करना ही उसकी अन्तिम इच्छा है। अपने जीवन के अवसान के समय पर भी राष्ट्र का उदय चाहने वाली नारियाँ हमारे लिए सदैव स्मरणीय है।

-डी-1, विद्यालय मार्ग, तिलक नगर, जयपुर

आयुर्वेद स्तम्भः

# रसायनं नोपयुञ्जीत

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**गताङ्के लिखितं मया यत् 'रसायनं प्रयुञ्जीत', तत्र केचित् सामान्याः निर्देशा अपि सङ्केतिताः। किन्तु सर्वैः सर्वदा रसायनस्योपयोगः न समीचीनः। यद्यपि रसायनप्रयोगेण शरीरे शस्तानां रसादीनां धातूनामभिवर्द्धनं सुस्थितिश्च भवति, पुनरप्यस्य प्रयोगे न स्वतन्त्रता वर्तते। भारतवर्षस्योत्तरेषु समस्तेषु प्रान्तेषु यत्र यत्र शीतस्याधिक्यं भवति तत्र तत्र शीतकाले बहवः जनाः पारम्परिकाणां वीर्यप्रधानानां विशिष्टकार्यकराणां शुण्ठी-पिप्पली-हरिद्रा-यवानी-मेथिका-बला-गोक्षुर-कुमारीत्यादीनां प्रसिद्धानां सामान्यजनैर-भिज्ञातानां द्रव्याणां सेवनं रसायनविधिना मोदकनिर्माण-प्रक्रियानन्तरं कुर्वन्ति। एवमेव चिकित्सकनिर्देशेन मूसलीपाककपिकच्छुपा-केत्यादीनां विशिष्टानां पाककल्पेन विनिर्मितानां द्रव्याणां सेवनमपि कुर्वन्ति।**

गताङ्क में मैंने लिखा था कि 'रसायनं प्रयुञ्जीत', वहाँ कुछ सामान्य निर्देश भी संकेतित किए गए थे। किन्तु सबके द्वारा सर्वदा रसायन का उपयोग उपयुक्त नहीं है। यद्यपि रसायन के प्रयोग से शरीर में प्रशस्त धातुओं का अभिवर्द्धन और सुस्थिति होती है। फिर भी इसके प्रयोग में स्वतन्त्रता नहीं है। भारतवर्ष के उत्तरी समस्त प्रान्तों में जहाँ-जहाँ शीत की अधिकता होती है वहाँ-वहाँ शीतकाल में अनेक लोग पारम्परिक, वीर्यप्रधान, विशिष्ट कार्य करने वाले सोंठ, पीपल, हल्दी, अजवायन, मेथी, खरेंटी, गोखरू एवं ग्वारपाठा इत्यादि सामान्य लोगों के द्वारा भी जाने-जाने वाले विभिन्न प्रसिद्धि द्रव्यों का सेवन रसायनविधि से मोदकनिर्माण प्रक्रिया के बाद करते हैं। इसी तरह चिकित्सक के निर्देश से मूसलीपाक, कौंचपाक, एरण्डपाक, अमृतभल्लातक, अश्वगन्धापाक, बादामपाक इत्यादि विशिष्ट पाककल्प से निर्मित द्रव्यों का भी सेवन करते हैं।

**एतेषां रसायनद्रव्याणां सेवनस्य विधिः द्विविधः वर्तते। अत एव रसायनसेवनात् पूर्वमेव नियतता करणीया यत् केन विधिना रसायनस्य प्रयोगः करणीयः।'कौ चेतौ विधी' इति त्वग्रिमे कस्मिंश्चिल्लेखे वर्णनं करिष्यामि, किन्त्वत्र तूल्लेखनीयः विषयः वर्तते यत् रसायनस्य प्रयोगः सरलः न वर्तते। यदा हि वयस्काः वृद्धाः वा जनाः शुण्ठीत्यादीनां द्रव्याणां सेवनं रसायनविधिना कुर्वन्ति तदा ते किञ्चित्किञ्चिदंशं स्व-पुत्रपौत्रादिभ्योऽपि वितरन्ति। विशेषेण च प्रसूताः स्त्रियः कुर्वन्त्येवम्। बालक-बालिका अपि नियमितरूपेण स्वदुता-मनुभवन्ति तेषां रसायनकल्पानाम्। नैतदुपयोगिनः सन्त्येते रसायनकल्पाः तेषां बालकानां बालिकानाञ्च कृते। यतो हि विशिष्टानां द्रव्याणां सेवनक्रमे विशिष्टयोराहारविहारयोः पथ्यापथ्यानाञ्च परिपालनस्यावश्यकता वर्तते, न हि कुर्वन्ति ते बालकाः पथ्यापथ्यपालनम्। अतः तेष्वेतेषां प्रयोगः न समुचितः। तेभ्यस्तु पृथक् रसायनकल्पाः व्यवस्थिता सन्ति, तेषां: प्रयोगः करणीयः।**

इन रसायन-द्रव्यों के सेवन की विधि दो प्रकार की है। इसलिए रसायन-सेवन से पहले ही निश्चित कर लेना चाहिए कि किस विधि से रसायन का प्रयोग करना है। ये दो विधियाँ कौनसी हैं, यह तो किसी अग्रिम लेख में वर्णन करूँगा, लेकिन यहाँ उल्लेखनीय विषय यह है कि रसायन का प्रयोग सरल नहीं है। जब भी वयस्क या वृद्धजन शुण्ठी इत्यादि द्रव्यों का सेवन रसायनविधि से करते हैं तो थोड़ा-थोड़ा टुकड़ा अपने पुत्र-पौत्रादि को भी दे देते हैं। विशेष रूप से प्रसूता स्त्रियाँ ऐसा करती हैं। बालक और बालिकाएँ भी उन रसायन कल्पों के स्वाद का आनन्द लेते हैं। ये रसायन उन बालक-बालिकाओं के लिए उपयोगी नहीं हैं। क्योंकि विशिष्ट द्रव्यों के सेवन-क्रम में विशिष्ट आहार-विहार और पथ्यापथ्य के परिपालन की आवश्यकता होती है, लेकिन वे बालक पथ्यापथ्य का परिपालन नहीं करते हैं। इसलिए उनमें इन रसायनों का प्रयोग उपयुक्त नहीं है। उनके लिए तो पृथक् रसायन कल्प हैं, उनका प्रयोग करना चाहिए।

**बालकास्तु पथ्यापथ्य-पालन-क्रमेऽनवधानाः भवन्ति, अत एव तेषु विशिष्टानामुग्रवीर्याणां कल्पानां प्रयोगः न करणीयः। किन्तु ये कल्पाः विशिष्टानां विधीनां पथ्यापथ्यादीना चापेक्षां न कुर्वन्ति तेषां 'गोंद के मोदक' 'बादामपाक' 'चन्दशूर-मोदक' 'च्यवनप्राश' 'ब्राह्मरसायनेत्यादीनां' रसायनकल्पानां प्रयोगः करणीयः। ये च सामान्याः वृद्धा वयस्काः वा जनाः सन्ति तैः सर्वैरपि**

**रसायनस्य सेवनं समुचितंमिति तु न। आचार्यः सुश्रुतः निर्दिशति यत्- अथ खलु सप्तपुरुषा रसायनं नोपयुञ्जीरन्, तद्यथा-अनात्मवानलसो दरिद्रः प्रमादी व्यसनी पापकृद् भेषजापमानी चेति। सप्तभिरेव कारणैर्न सम्पद्यते, तद्यथा-अज्ञानादनारम्भादस्थिरचित्तत्वाद्दारिद्र्यादना-यतत्वादधर्मा दौषधालाभाच्चेति।( सु.चि. 30/4 )**

बालक तो पथ्यापथ्य के प्रयोग में असावधान होते हैं, इसलिए उनमें विशिष्ट उग्रवीर्य कल्पों का प्रयोग नहीं करना चाहिए। किन्तु जो कल्प विशिष्ट विधियों की और पथ्यापथ्य की अपेक्षा नहीं करते उन- 'गोंद के लड्डू', बादामपाक, हालौं के लड्डू, च्यवनप्राश, ब्राह्मरसायन इत्यादि रसायनकल्पों का प्रयोग करना चाहिए। जो सामान्य वृद्ध या वयस्क लोग हैं उन सभी के लिए रसायन का प्रयोग उपयुक्त है, ऐसा भी नहीं है। आचार्य सुश्रुत निर्देश देते हैं कि- सात पुरुषों को - आलसी, दरिद्र, प्रमादी, व्यसनी, पापी और भेषज का अपमान करने वाला। इन कारणों से सात के द्वारा सम्पादित नहीं किया जाता है। जैसे अज्ञान से, अनारम्भ से, अस्थिर चित्त के कारण दरिद्रता के कारण, स्वयं के वश में (नियन्त्रण में) न रहने के कारण, अधर्म के कारण और (भेषजापमानी होने के कारण) औषध को प्राप्त नहीं करने से।

**अनात्मवान् अप्रशस्तात्मा मिथ्याचार-प्रवृत्तो मूढबुद्धिर्भवति। बालकास्तु बाला अज्ञा एव भवन्ति, पथ्यापथ्यविवेकहीनाश्च ते भवन्ति, अत एव 'अनात्मवान्' इति वचने तेषामपि ग्रहणं भवति, अतः तेषु रसायनं नोपयुञ्जीत, विशेषतस्तु बाल्यकालादारभ्य चतुर्दशवर्ष-पर्यन्तेषु बालकेषु विशेषपरिस्थितौ विशिष्टानां रसायनानामनुग्रवीर्याणां वा द्रव्याणां रसायनपरकः प्रयोगः करणीयः। तदनन्तरमपि विशेषावधानेन प्रयोगः समुचितः। अलसस्य दरिद्रस्य च अनवस्थितचित्तत्वाद् उपकरणहीनत्वात् अनारम्भत्वाच्च प्रवृत्तिरेव न भवति रसायनप्रयोगे। प्रमादी नियमितरूपेण सेवनं न करोत्यत एव निष्फलो भवति रसायनप्रयोगः। व्यसनानि तु द्यूतमद्यवेश्यादीनि भवन्ति तेषु निरतः रसायनस्यायोग्यो भवति। पापकृद् अधर्मे निरतो भवति, भेषजापमानी निष्ठावान्न भवत्यत एवैतावप्ययोग्यौ भवतः रसायनप्रयोग-क्रमे। अत एवैतेषु रसायनं नोपयुञ्जीत।**

अनात्मवान व्यक्ति अप्रशस्तात्मा मिथ्याचरण में प्रवृत्त मूढ बुद्धिवाला होता है। बालक तो बाल अर्थात् अज्ञ (अल्पज्ञ) ही होते हैं, वे पथ्यापथ्य के विवेक से हीन होते हैं, इसलिए 'अनात्मवान्' इस वचन से उनका भी ग्रहण हो जाता है, इसलिए उनमें रसायन का प्रयोग नहीं करना चाहिए, विशेषरूप से बाल्यकाल से लेकर चौदह वर्ष तक की आयु के बालकों में विशेष परिस्थिति में विशिष्ट रसायनस्वरूपक अनुग्रवीर्यवाले (सौम्य) द्रव्यों का रसायनपरक प्रयोग करना चाहिए। उसके बाद भी (उसके बावजूद भी) विशेष सावधानी से ही प्रयोग उचित है। आलसी और दरिद्र के अस्थिरचित्तवाला होने के कारण और उपकरणहीन होने के कारण प्रारम्भ ही नहीं करने से रसायन प्रयोग में प्रवृत्ति ही नहीं होती। प्रमादी (लापरवाह) नियमित रूप से सेवन नहीं करता है इसलिए रसायनप्रयोग निष्फल होता है। द्यूत, मद्य एवं वेश्यागमन आदि व्यसन होते हैं, उनमें लगा हुआ व्यक्ति रसायन के अयोग्य होता है। पापी व्यक्ति अधर्म में लगा रहता है, भेषज का अपमान करने वाला निष्ठावान् नहीं होता है, इसलिए ये दोनों भी रसायन प्रयोगक्रम में अयोग्य होते है। अतः इन सभी में रसायन का प्रयोग नहीं करना चाहिए।

**शुण्ठीखण्ड :**

**सामान्यतया बहवः जनाः शीतकाले रसायनस्वरूपे शुण्ठीप्रयोगमधिकमात्रायां कुर्वन्ति, प्रसूतास्वप्यस्य प्रयोग-मावश्यकरूपेण परम्परया कुर्वन्त्युत्तरे भारते। किन्तु तत्र कुटीप्रावेशिकरूप एवास्य प्रयोगः समुचितः पथ्यापथ्ययोः विचारोऽप्यत्र परमावश्यकः। मनागप्यनवधानता महतां, कष्टानामुत्पत्तिं करोति प्रयोगकर्तरि। यो हि सम्पूर्णे जीवनकाले तैस्तैः विकारैः परिपीडितो भवति। अत एव शुण्ठीप्रयोगे विशेषरूपेण सावधानता भवेदिति सुनिश्चितता करणीया। यदि चेत् स्वल्पमात्रायामेव शुण्ठीप्रयोगं रसायनविधिना करोति कोऽपि जनस्तदा आहारविहारेषु परिहारस्याप्यल्पतैव भवति। स्वल्पस्यापथ्यस्य सेवनं यदि कदाचिदनवधानतया भवति तदा कस्यचिदपि महद्विकार-स्योत्पत्तिर्न भवति। अत एव प्रसूतासु शास्त्रोक्तविधिना निर्मितस्य सौभाग्यशुण्ठीपाकस्याथवात्र वक्ष्यमाणस्य 'शुण्ठीखण्ड' इति नामधेयस्य योगस्य प्रयोगः करणीयः। अन्ये जना अप्यस्य प्रयोगेण स्वल्पपथ्यपरिपालनेन रसायनस्य फलं लभन्ते।**

**शुण्ठीखण्डः-**

सामान्यतया अनेक लोग शीतकाल में रसायनस्वरूप में शुण्ठी का प्रयोग अधिक मात्रा में करते हैं, प्रसूताओं में भी इसका प्रयोग आवश्यक रूप से उत्तर भारत में परम्परा से करते हैं। लेकिन इसमें कुटीप्रावेशिक रूप से ही इसका प्रयोग उपयुक्त है। पथ्यापथ्य का विचार भी इसमें परमावश्यक है। थोड़ी सी असावधानी भी बड़े कष्टों को उत्पन्न करती है प्रयोगकर्ता में। जो कि सम्पूर्ण जीवनकाल में उन-उन विकारों से पीडित रहता है। इसलिए शुण्ठीप्रयोग में विशेषरूप से सावधानी रहे यह सुनिश्चित करना चाहिए। यदि कोई व्यक्ति रसायनविधि से अल्प मात्रा में ही सोंठ का प्रयोग करता है तो आहार-विहारों में परिहार (छोड़ना इत्यादि, पथ्यापथ्यविचार) की भी अल्पता ही होती है। यदि कभी असावधानीवश थोड़े से अपथ्य का सेवन हो भी जाता है तो किसी बड़े विकार की उत्पत्ति नहीं होती। इसलिए प्रसूताओं में शास्त्रोक्त विधि से निर्मित सौभाग्य शुण्ठीपाक अथवा यहाँ बताए जा रहे 'शुण्ठीखण्ड' इस नाम के योग का प्रयोग करना चाहिए। अन्य लोग भी इसके प्रयोग से थोड़े से पथ्य के परिपालन से ही रसायन के फल को प्राप्त करते हैं।

**250 ग्रामपरिमितं शुण्ठीचूर्णं एक किलोग्राम-परिमिता शर्करा गोघृतञ्च 500 ग्रामपरिमितं गृह्णीयात्। सर्वप्रथमं घृते शुण्ठीचूर्णस्य सामान्यं भर्जनं करणीयम्, तत्पश्चात् शर्करातः मत्स्यण्डिकायाः निर्माणं कुर्यात्। सम्यग् विनिर्मितायां मत्स्यण्डिकायां भर्जितस्य शुण्ठीचूर्णस्य निक्षेपः करणीयः। तदनन्तरं निम्नलिखितानां द्वादशानां द्रव्याणां सुसूक्ष्मस्य चूर्णस्य प्रक्षेपं कृत्वा स्थाल्यां विस्तीर्य खण्डस्वरूपे समविभजनं करणीयम्। चतुष्कोणात्मकस्य षट्ग्रामपरिमितस्यैतस्य खण्डस्य पयसा सह नियमितरूपेण प्रातःकाले सायङ्काले च प्रयोगः करणीयः। प्रक्षेपस्वरूपाणि तु द्रव्याणीमानि सन्ति, तद्यथा दश ग्रामपरिमितमामलकी-चूर्णम्, धान्यक-मुस्ता-जीरक-पिप्पली-तुगाक्षीरी-त्वक्-एला-पत्र-हरीतकीनाञ्च द्रव्याणां प्रत्येकं पृथक्-पृथक् रूपेण 10 ग्रामपरिमितायां मात्रायां ग्रहणं करणीयम्। अत्रैव च 5 ग्रामपरिमितस्य च नागकेशरस्यापि संयोगः करणीयः। सर्वेषां द्रव्याणामेव सुसूक्ष्मं चूर्णमत्र प्रक्षेपणीयम्।**

**एषः शुण्ठीखण्डः निरापदो भवति। अस्य प्रयोगेणाम्ल-पित्तस्य निवृत्तिर्भवति। आमदोषस्यामवातस्य च प्रशमनं भवति, दीर्घकालिकस्यामदोषजन्यस्योदर-शूलस्य निवृत्तिर्भवति। ये सामान्यतयोदरशूलेन पीडिताः भवन्ति, तेषु नियमित-प्रयोगेणोदरशूलस्य शान्तिर्भवति। हृल्लासस्याग्नि-मान्द्यस्य कदाचिज्जायमानस्य वमनस्यापि च प्रशमनं भवत्यनेन शुण्ठीखण्डेन। अतीव बलदः वायोरनुलोमकः वातनाडीबलप्रदः पेशीनां च पुष्टिकर्त्ता शुण्ठीखण्डः हेमन्ते शिशिरे च सेवनीयः। सावधानता त्वत्रापि परिपालनीया।**

250 ग्राम सौंठ का चूर्ण, एक किलो ग्राम चीनी, 250 ग्राम गाय का घी लेना चाहिए। सर्वप्रथम घी में सोंठ के चूर्ण को हल्का भूनना चाहिए। उसके बाद चीनी की चासनी बनानी चाहिए। अच्छी प्रकार से बनी हुई चासनी में भुने हुए सोंठ का चूर्ण डालना चाहिए। उसके बाद निम्नलिखित 12 द्रव्यों के सूक्ष्म चूर्ण को डालकर थाली में फैला कर टुकडों के रूप में बराबर विभाजन कर लेना चाहिए। चक्कियाँ काट लेनी चाहिए। चौकोर रूप के छः ग्राम की मात्रावाले इस खण्ड का दूध के साथ नियमित रूप से प्रातःकाल और सायङ्काल प्रयोग करना चाहिए। प्रक्षेपवाले द्रव्य तो ये हैं जैसे- दश ग्राम आँवले का चूर्ण, धनिया, नागरमोथा, जीरा, पीपल, वंशलोचन, दालचीनी, इलायची, तेजपत्ता और हरड़ इन द्रव्यों को प्रत्येक को पृथक्-पृथक् रूप से दश ग्राम की मात्रा में लेना चाहिए। इसी में 5 ग्राम मरिच का और पाँच ग्राम नागकेशर का संयोग करना चाहिए। सभी द्रव्यों का सूक्ष्मचूर्ण इसमें डालना चाहिए।

यह शुण्ठीखण्ड निरापद होता है। इसके प्रयोग से अम्लपित दूर होता है, आमदोष और आमवात का प्रशमन होता है, दीर्घकालिक आमदोष जन्य उदरशूल की निवृत्ति होती है। जो सामान्यतया उदरशूल से पीडित होते हैं, उनमें नियमित प्रयोग से उदरशूल की शान्ति होती है। जी मिचलाना, अग्निमान्द्य और कभी-कभी होने वाले वमन का भी इस शुण्ठीखण्ड के प्रयोग से प्रशमन होता है। अत्यन्त बलदायक, वायु का अनुलोमक, वातनाडियों को बल देने वाला और पेशियों को पुष्ट करने वाला यह शुण्ठीखण्ड हेमन्त और शिशिर में सेवन करने योग्य है। सावधानी तो इसमें भी रखनी ही चाहिये।

80, सेनापति हाउस के पीछे,
प्रेमनगर, झोटवाड़ा, जयपुर (राज.)

हार्दिक शुभकामनाओं सहित :-

निर्माता

# ए इन्फ्रास्ट्रक्चर लिमिटेड

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स,
लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्सः- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

**हमारी विशेषताएं**

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**

विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**

**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011-47642000 से 30 फैक्स: 011-47642015 E-mail: circ@pbdl.in

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

2 वर्ष
सच होते सपने
पूरे होते वादे

सत्यमेव जयते
राजस्थान सरकार

# राजस्थान सरकार के दो साल
# सच होते सपने, पूरे होते वादे

राजस्थान सरकार ने अपने 2 साल के कार्यकाल में दूरदर्शी सोच के साथ कई पहल और बदलाव किये जिससे लोगों को उनका हक मिला, सुविधाएं बढ़ी, महिलाएं सशक्त हुईं, युवा प्रशिक्षित हुए और राज्य में रोज़गार के नये अवसर पैदा हुए। हर क्षेत्र और हर वर्ग के विकास के साथ राजस्थान आज उन्नति की राह पर अग्रसर है...



- **'सरकार आपके द्वार'** में सरकार ने आम जन तक पहुंच कर 3 लाख परिवेदनाएं निस्तारित की
- **'न्याय आपके द्वार'** – 21.43 लाख राजस्व प्रकरण निस्तारित
- **राजस्थान अधीनस्थ एवं मंत्रालयिक सेवा चयन बोर्ड का गठन**
- 35,000 **ई–मित्र/सीएससी** पर अब 80 विभागों की 200 सेवाएं घर के पास उपलब्ध
- **भामाशाह योजना** – 3.40 करोड़ से ज्यादा लोगों का नामांकन; 597 करोड़ रुपयों से अधिक सहायता राशि सीधा लोगों के बैंक खातों में
- **स्वच्छ भारत – स्वच्छ राजस्थान** : 22.18 लाख शौचालय निर्मित और 1128 ग्राम पंचायतें खुले में शौच से मुक्त
- **'राजस्थान सम्पर्क'** प्रभावी व्यवस्था से समस्याओं के समाधान 2.28 लाख लोगों को मिली राहत
- **भामाशाह स्वास्थ्य बीमा योजना** – ₹ 30,000 से 3 लाख तक का इलाज; 1 करोड़ परिवारों को होगा लाभ
- **रिसर्जेंट राजस्थान से 3.21 लाख करोड़ रुपये का निवेश प्रस्तावित, 2 लाख 50 हज़ार नए रोज़गार के अवसर**
- बदलती राशन वितरण प्रणाली – 5000 **अन्नपूर्णा भण्डारों** पर 150 से ज़्यादा वस्तुएं उचित मूल्य पर गांवों में उपलब्ध होंगी; 'पॉस' मशीन से बायोमैट्रिक आधारित होगा राशन वितरण
- 71 **स्वामी विवेकानन्द मॉडल स्कूल** प्रारम्भ; हर ग्राम पंचायत पर होगा **आदर्श विद्यालय**
- 5 लाख छात्राओं को साइकिल वितरण
- **रोज़गार** – 60 हज़ार नियुक्तियां; 1 लाख नियुक्तियां प्रक्रिया में; 3 लाख युवा प्रशिक्षित
- **नई सौर ऊर्जा नीति** – किसान अपनी ज़मीन सीधे लीज़ पर दे सकते हैं
- ग्राम पंचायतों में **ग्रामीण गौरव पथ** – 1185 कार्य पूर्ण
- 80,868 कृषि एवं 31,561 कुटीर ज्योति कनेक्शन जारी

राजस्थान संवाद

#DIPRRajasthan

सूचना एवं जन सम्पर्क विभाग, राजस्थान सरकार

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,